A.C. Joshi Library
P.U. Chandigarh

MSS No. 176 Subject Religion

Name of MSS नामलिंगानुशासन Nāmalinganusāsana

Author अमर सिंह

Period - -

Folios 99

Script Sanskrit

Source Prithipal Singh, Amritsar

Missing Folios - -

183

183

...र्तनं सफलमाद्यपतरितिहार्भ्यां २३ यानि मानि परममंगलानि पवनहंसग

...रशास्कंधभावार्थस्मदीपिकां श्रीमानवधूतभीतेनश्रीधरेणमकारिता १

...णात्यक्त्वा समुद्रोसावयत्क्षणात् वर्णयितामहाराजश्रीमद्भगवदालयं २३ नित्यंसन्निहि

...भगवान्मधुसूदनः स्मृत्वाशेषाशुभहरं सर्वमंगलमंगलं २४ स्त्रीबालवृद्धानादायहतशेषान्ध

...ः इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् २५ श्रुत्वासुहृद्वधं राजन्नर्जुनात्ते पितामहः त्वां तु वंशध

रं कृत्वा जग्मुः सर्वे महापथं २६ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः

प्रमुच्यते २७ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि अन्यत्र चेह च श्रुतानि

गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत २८ इति श्रीभागवते महापुराणे एकादशस्कंधे वैया

सिक्यां पारमहंस्यां संहितायामष्टादशसाहस्र्यां श्रीभगवदुद्धवसंवादे मौसलोपाख्याने एकत्रिंशोध्यायः ३१

यं नेन [illegible] सिद्धे ३ मासे [illegible]

पनंनः [illegible] संख्यासिद्धे ३ मासे [illegible] विक्रमपते तिथौ नवम्यां रविवासरे [illegible] दिनं शुभाख्यातमसि

संवत् [illegible]

॥ श्लोके ॥

...कत्रिंशोध्यायः ३१ समाप्तोयमेकादशस्कंधः शुभमस्यात्

भू. द्वि. १

प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ७ आर्यावर्त्तः पुण्यभूमिर्मध्यं वि
न्ध्यहिमागयोः नीवृज्जनपदो देशविषयौ तूपवर्तनम् ८ त्रिष्वागोष्ठान्नड
प्रायो नड्वान्नड्वल इत्यपि कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ९ शाद्व
लः शादहरिते सजंबाले तु पंकिलः जलप्रायमनूपं स्यात्पुंसि कच्छस्तथा
विधः १० स्त्री शर्करा शर्करिलः शार्करः शर्करावति देश एवादिमावे
वमुन्नेयाः सिकतावति ११ देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः स्यान्न
दीमातृको देवमातृकश्च यथाक्रमम् १२ सुराज्ञि देशे राजन्वान्स्यात्ततोऽन्य
त्र राजवान् गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् १३ पर्यन्तभूः परि

ङ्गतंततः वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः नृब्रह्मक्षत्रविट्शूद्रैः सां
गोपांगैरिहोदिताः १ भूर्भूमिरचलानंतारसाविश्वंभरास्थिरा धराधरित्री
धरणीक्षोणीर्ज्याकाश्यपीक्षितिः २ सर्वंसहावसुमतीवसुधोर्वीवसुंधरा गो
त्राकुः पृथिवीपृथ्वीक्ष्मावनिर्मेदिनीमही ३ मृन्मृत्तिकाप्रशस्तातुमृत्सा
मृत्स्नाचमृत्तिका ४ उर्वरासर्वसस्याढ्यास्यादूषःक्षारमृत्तिका ऊषवा
नूषरोद्वावप्यन्यलिंगौस्थलंस्थली ५ समानौमरुधन्वानौद्वौखिलाप्रहतेसमे
त्रिष्वथोजगतीलोकोविष्टपंभुवनंजगत् ६ लोकोयंभारतंवर्षं
शरावत्यास्तुयोवधेः देशःप्राग्दक्षिणःप्राच्यउदीच्यःपश्चिमोत्तरः प्रत्यं

गली ३

अ. विपणिः पण्यवीथिका २ रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् प्रा

द्वि. कारो वरणः शालः प्राचीरं प्रांततो वृतिः ३ भित्तिः स्त्री कुड्यमेडूकं यदंतर्न्यस्त

२ कीकसम् गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ४ निशांतपस्त्यसदनं भ

वनागारमंदिरं गृहाः पुंसि च भूम्न्येव निकायनिलयालयाः ५ वासः कुटी द्व

योः शाला सभा संजवनं त्विदम् चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ६

चैत्यमायतनं तुल्ये वाजिशाला तु मंदुरा आवेशनं शिल्पिशाला प्रपा पानीय

शालिका ७ मठश्छात्रादिनिलयो गंजा तु मदिरागृहम् गर्भागारं वासगृ गृहमध्यभागस्य २

हमरिष्टं सूतिकागृहम् ८ वातायनं गवाक्षोऽथ मंडपोऽस्त्री जनाश्रयः हर्म्यादि २

प्रसूतिकास्त्रीगृहनाम १ जालकस्य नाम १ मंडपस्य नाम १ यत्र धनीनां वासः तद्धर्म्यादि कथ्यते १

मरः सेतुरालौ स्त्रियां पुमान् वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् १४
अयनं वर्त्म मार्गाध्वपंथानः पदवी सृतिः सरणिः पद्धतिः पद्या वर्त्तन्येकप
दीति च १५ अतिपंथाः सुपंथाश्च सत्पथश्चार्चितेध्वनि व्यध्वो दुरध्वो विप
थः कदध्वा कापथः समाः १६ अपंथास्त्वपथं तुल्ये शृंगाटक चतुष्पथे प्रां
तरं दूरशून्योध्वा कांतारं वर्त्म दुर्गमम् १७ गव्यूतिः स्त्री क्रोशयुगं नल्वः कि
ष्कुचतुः शतं घंटापथः संसरणं तत्पुरस्योपनिष्करम् १८ इति भूमिवर्गः १
पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् स्थानीयं निगमोन्यत्तु यन्मूलनगरा
त्परम् १ तच्छाखानगरं वेशो वेश्याजनसमाश्रयः आपणस्तु निषद्यायां

अ॰
द्वि॰
३

तर्हिस्त्ववेदिका तोरणोस्त्रीबहिर्द्वारंपुरद्वारंतुगोपुरम् १६ कूटंपूर्द्वारियद्धस्ति
नखस्तस्मिन्नथत्रिषु कपाटमररंतुल्येतद्विष्कंभोर्गलंनना १७ आरोहणंस्या
त्सोपानंनिश्रेणिस्त्वधिरोहिणी संमार्जनीशोधनीस्यात्संकरोवकरस्तथा १८
क्षिप्तेमुखंनिःसरणंसंनिवेशोनिकर्षणः समौसंवसथग्रामौवेश्मभूर्वास्तुर
स्त्रियां १९ ग्रामांतउपशल्यंस्यात्सीमसीमेस्त्रियामुभे घोषआभीरपल्लीस्या
त्पक्वणःशबरालयः २० इतिपुरवर्गः २ महीध्रेशिखरिक्ष्माभृदहार्यधरपर्व
ता अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः १ लोकालोकश्चक्रवालस्त्रि
कूटस्त्रिककुत्समौ अस्तस्तुचरमक्ष्माभृदुदयःपूर्वपर्वतः २ हिमवान्निषधो

धनिनांवासःप्रासादोदेवभूभुजाम् ९ सौधोस्त्रीराजसदनमुपकार्योपा
कारिका॥ स्वस्तिकःसर्वतोभद्रोनंद्यावर्तादयोपिच १० विच्छंदकःप्रभेदा
हिभवंतीश्वरसद्मनाम्॥ स्त्र्यागारंभूभुजामंतःपुरंस्यादवरोधनम् ११ शुद्धां
तश्चावरोधश्चस्यादट्टःक्षौममस्त्रियाम्॥ प्रघाणप्रघणालिंदाबहिर्द्वारप्रको
ष्ठके १२ गृहावग्रहणीदेहल्यंगणंचत्वराजिरे॥ अधस्ताद्दारुणिशिलानासा
दारुपरिस्थितं १३ प्रच्छन्नमंतर्द्वारंस्यात्पक्षद्वारंतुपक्षकः॥ वलीकनी
ध्रेपटलप्रांतेथपटलंछदिः १४ गोपानसीतुवलभीछादनेवक्रदारुणि॥
कपोतपालिकायांतुविटंकंपुंनपुंसकम् १५ स्त्रीद्वार्द्वारंप्रतीहारःस्याद्वि

कृत्रिमवृक्षसमूहस्यनाम।२ मंत्रिवेश्यागृहोपवनस्य।

अ. हिं. ५

स्तनिष्कुटः १ आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ॥ अमात्यगणिकागेहो
पवने वृक्षवाटिका २ पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ॥ स्यादेतदे
व प्रमदावनमंतःपुरोचितम् ३ वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु
राजयः ॥ वन्या वनसमूहे स्यादंकुरोभिनवोद्भिदि ४ वृक्षो महीरुहः शाखी वि
टपी पादपस्तरुः ॥ अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः ५ वानस्पत्यः
फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ॥ ओषध्यः फलपाकांताः स्यादवंध्यः फलेग्रहिः
वंध्योऽफलोऽवकेशी च फलवान्फलिनः फली ॥ प्रफुल्लोत्फुल्लसंफुल्लव्याको
शविकचस्फुटाः ७ फुल्लश्चैते विकसिते स्युरवंध्यादयस्त्रिषु ॥ स्थाणुरस्त्रीध्रुव

पुष्पजातैः फलैः लक्षितः वानस्पत्यः कथ्यते अपुष्पाजातैः फलैर्वनस्पतिः कथ्यते २

ऋतुकालेफलरहितस्यनाम२ अवंध्यादयो त्रिलिंगाः

पाषाण २ पर्वत २

विंध्यो माल्यवान्पारियात्रकः गंधमादनमन्ये च हेमकूटादयो नगाः ३ पाषा
णः प्रस्तरग्रावोपलाश्मानः शिला दृषत् कूटोऽस्त्री शिखरं शृंगं प्रपातस्तु तटो
भृगुः ४ कटकोऽस्त्री नितंबोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियां उत्सः प्रस्रवणं वा
रिप्रवाहो निर्झरो झरः ५ दरी तु कंदरो वा स्त्री देवखातबिले गुहा गह्वरं गंड
शैलास्तु च्युताः स्थूलोपलाः गिरेः ६ खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यंत
पर्वताः उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ७ धातुर्मनःशिलाद्यद्रेर्गै
रिकं तु विशेषतः निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे ८ इति शैलव
र्गः ३ अटव्यरण्यं विपिनं गहनं काननं वनम् महारण्यमरण्यानी गृहारामा

महारण्यनाम १ गृहोपवनस्यनाम १

अ० टि० ५

सस्यं वृंतं प्रसवबंधनम् ॥ आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु १५ क्षारको जाल-
कं क्लीबे कलिका कोरकः पुमान् ॥ स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोस्त्रियाम् १६
स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ॥ मकरंदः पुष्परसः परागः सुमनोरजः १७
द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ॥ आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले १८
बार्हतं च फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ॥ पुष्पे जातिप्रभृतयः स्वलिंगा व्रीहयः फ-
ले १९ विदार्याद्यास्तु मूलेपि पुष्पे क्लीबेपि पाटला ॥ बोधिद्रुमश्चलदलः पिप्पलः कुं-
जराशनः २० अश्वत्थेथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ॥ तस्मिन्दधिफलः पुष्पफ-
लदंतशठावपि २१ उदुंबरो जंतुफलो यज्ञांगो हेमदुग्धकः ॥ कोविदारे चमरिकः कु- ५

दः शाखी ह्रस्वशाखाशिफः क्षुपः ८ अप्रकांडे स्तंवगुल्मौ वल्ली तु व्रततिर्लता
लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ९ नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्र
यश्च सः प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोः १० समे शाखा
लते स्कंधशाखाशाले शिफाजटे शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गताल
ता ११ शिरोग्रं शिखरं वा ना मूलं बुध्नोंघ्रिनामकः सारो मज्जा नरि त्वक्स्त्री
वल्कं वल्कलमस्त्रियाम् १२ काष्ठं दार्विंधनं त्वेध इध्ममेधः समित्स्त्रियाम्
निष्कुहः कोटरं वा ना वल्लरिर्मंजरिः स्त्रियौ १३ पत्रं पलाशं छदनं दलं पर्णं छ
दः पुमान् पल्लवोस्त्री किशलयं विस्तारो विटपोस्त्रियाम् १४ वृक्षादीनां फले

अ॰ द्वि॰ ९

काः रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ २१ बिल्वे शाण्डिल्यशैलूषौ मालूर

श्रीफलावपि प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः २२ गालवः शाबरो लोध्रस्ति

रीटस्तिल्वमार्जनौ आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः २३ कुंभोलूखलकं

क्लीबे कौशिको गुग्गुलुः पुरः शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः २४ राजा

दनं प्रियालः स्यात्सन्नकद्रुर्धनुष्पटः गंभारी सर्वतोभद्रा काश्मरी मधुपर्णिका २५

श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः कर्कन्धूर्बदरी कोलिः कोलं कुवलफे

निले २६ सौवीरं बदरं कोलमथ स्यात्स्वादुकण्टकः विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्या

घ्रपादपि २७ ऐरावतो नागरंगो नादेयी भूमिजम्बुका तिंदुकः स्फूर्जकः कालस्कन्धश्च ९

शितिसारकै २८ काकेंदुः कुलकः काकपीलुकः काकतिंदुके गोलीढो झाटलो घं

द्दालोयुगपत्रकः २२ सप्तपर्णोविशालत्वक्शारदोविषमछदः आरग्वधेराजवृक्षशं
म्पाकचतुरंगुलाः २३ आरेवतव्याधिघातकृतमालसुवर्णकाः स्युर्जंभीरेदंतशा
ठजंभजंभीरजंभलाः २४ वरुणोवरणःसेतुस्तिक्तशाकःकुमारकः पुंनागेपुरुष
स्तुंगःकेसरोदेववल्लभः २५ पारिभद्रेनिंबतरुर्मंदारःपारिजातकः तिनिशेस्यंदनो
नेमीरथद्रुरतिमुक्तकः २६ वंजुलश्चित्रकृच्चाथद्वौपीतनकपीतनौ आम्रातके
मधूकेतुगुडपुष्पमधुद्रुमौ २७ वानप्रस्थमधुष्ठीलौजलजेत्रमधूलकः पीलौगु
डफलःस्रंसीतस्मिंस्तुगिरिसंभवे २८ अक्षोटकंदरालौद्वावंकोलेतुनिकोचकः
पलाशेकिंशुकःपर्णोवातपोथोथवेतसे २९ रथाभ्रपुष्पविदुरशीतवानीरवंजुलाः
द्वौपरिव्याधविदुलौनादेयीचांबुवेतसे ३० शोभांजनेशिग्रुतीक्ष्णगंधकाक्षीवमोचा।

अ॰
द्वि॰
८

पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः चिरबिल्वो नक्तमालः करजश्च करंजके ४७
प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः करंजभेदाः षड्ग्रन्थो मर्कट्यंगारवल्लरी ४८
रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः गायत्री बालतनयः खदिरो दंतधावनः ४९
अरिमेदो विट्खदिरे कदरः खदिरे सिते सोमवल्कोऽप्यथ व्याघ्रपुच्छगंधर्वहस्तकौ ५०
एरंड उरुबूकश्च रुचकश्चित्रकश्च सः चंचुः पंचांगुलो मंडवर्द्धमानव्यडंबकाः ११ ५१
अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा पिंडीतको मरुवकः श्वसनः करहा
टकः ५२ शल्यश्च मदने शक्रपादपः परिभद्रकः भद्रदारु द्रुकिलिमं पीतदारु च दा ८
रु च ५३ पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः पाटलिः पाटलामोघा काला

टापाटलिर्मोक्षमुष्ककौ ४९ तिलकः क्षुरकः श्रीमान्समौ पिचुलझावुकौ श्रीपर्णी।
काकुमुदिकाकुंभीकैटर्यकट्फलौ ५० क्रमुकः पट्टिकाख्यः स्यात्पट्टीलाक्षाप्रसा
दनः तूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ५१ तूलं च नीपप्रियककदंबास्तु ह
लिप्रियैः वीरवृक्षोरुष्करोग्निमुखी भल्लातकी त्रिषु ५२ गर्दभांडे कंदरालकपीत।
नसुपार्श्वकाः प्लक्षश्च तिंतिडीचिंचाम्लिकाथो पीतसारके ५३ सर्जकासनबंधू
कपुष्पप्रियकजीवकाः साले तु सर्जकार्श्याश्वकर्णकाः सस्यसंवरः ५४ नदीस
र्जो वीरतरुरिंद्रद्रुः ककुभोर्जुनः राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ५५
इंगुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः

अ॰
टि॰
८

फला ६१ अरिष्टः सर्वतोभद्रहिंगुनिर्यासमालकाः पिचुमंदश्च निंबेऽथ पिच्छिलागुरु
शिंशिपाः ६२ कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः भंडिलोऽप्यथ चांपेयश्चंप
को हेमपुष्पकः ६३ एतस्य कलिका गंधफली स्यादथ केशरे बकुलो वंजुलोऽशोके
समौ करकदाडिमौ ६४ चांपेयः केसरो नागकेसरः कांचनाह्वयः जया जयंती तर्का
री नादेयी वैजयंतिका ६५ श्रीपर्णमग्निमंथः स्यात्कणिका गणिकारिका ६६ ज
योऽथ कुटजः शक्रो वत्सको गिरिमल्लिका एतस्यैव कलिंगेंद्रयवभद्रयवं फले ६८
कृष्णपाकफलाविग्नसुषेणाः करमर्दके कालस्कंधस्तमालः स्यात्तापिच्छोऽप्यथ सिं
दुके ६९ सिंधुवारेंद्रसुरसौ निर्गुंडींद्राणिकेत्यपि वेणी खरा गरी देवताडो जीमूत इत्य ८

स्थालीफलेरुहा ५४ कृस्नवृंताकुवेराक्षीश्यामातुमहिलाह्वया लतागोवंदनी
गुंद्राःप्रियंगुःफलिनीफली ५५ विष्वक्सेनागंधफलीकारंभाप्रियकश्चसा॥ मं
डूकपर्णपत्रोर्णनटकट्वंगटुंटुकाः ५६ श्योनाकःशुकनासर्क्षदीर्घवृंतकुटंनटा
शोणकश्चारलूतिष्यफलात्वामलकीत्रिषु ५७ अमृताचवयस्थाचत्रिलिंगस्तु
बिभीतकः नाक्षस्तुषःकर्षफलोभूतवासःकलिद्रुमः ५८ अभयात्वव्यथाप
थ्याकायस्थापूतनामृता हरीतकीहैमवतीचेतकीश्रेयसीशिवा॥ ५९ पीतद्रुःस
रलःपूतिकाष्ठंचाथद्रुमोत्पलः कर्णिकारःपरिव्याधोलकुचोलिकुचोडहुः ६०
पनसःकंटकिफलोनिचुलोहिज्जलोंबुजः काकोडुंबरिकाफल्गुमलयूर्जघने

अं. हिं. ९

सचंडातहयमारकाः करवीरेकरीरेतुक्रकरग्रंथिलावुभौ ७८ उन्नःकितवोधूर्त्तोधू
स्तूरःकांचनाह्वयः मातुलोमदनश्चास्यफलेमातुलपुत्रकः ७९ फलपूरोबीजपू
रोरुचकोमातुलुंगके ७९ समीरणोमरुबकःप्रस्थपुष्पःफणिज्जकः जंबीरोप्य
थपर्णासेकठिंजरकुठेरकौ ८० सितेर्जकोत्रपाठीतुचित्रकोवह्निसंज्ञकः अर्काह्व
वसुकास्फोतगणरूपविकीरणाः ८१ मंदारश्चार्कपर्णोत्रशुक्लेलर्कप्रतापसौ शिव
मल्लीपाशुपतएकाष्ठीलोवृकोवसुः ८२ वंदावृक्षादनीवृक्षरुहाजीवंतिकेत्यपि
वत्सादनीछिन्नरुहागुडूचीतंत्रिकामृता ८३ जीवंतिकासोमवल्लीविशल्यामधुप ९
र्ण्यपि मूर्वादेवीमधुरसामोरटातेजनीस्रवा ८४ मधूलिकामधुश्रेणीगोकर्णी।

पिं ७० श्रीहस्तिनी तु भूरुंडी तृणशून्यं तु मल्लिका भूपदी शीतभीरुश्च सैवास्फो-
टा वनोद्भवा ७१ शेफालिका तु सुवहा निर्गुंडी नीलिका च सा सितासौ श्वेतसुरसा
भूतवेश्यथ मागधी ७२ गणिका यूथिकांबष्ठा सा पीता हेमपुष्पिका अतिमुक्तः
पुंड्रकः स्याद्वासंती माधवी लता ७३ सुमना मालती जातिः सप्तला नवमालिका
माध्यं कुंदं रक्तकस्तु बंधूको बंधुजीवकः ७४ सहा कुमारी तरणिरम्लानस्तु महा-
सहा तत्र शोणे कुरबकस्तत्र पीते कुरंटकः ७५ नीली झिंटी द्वयोर्बाणा दासी चा-
र्तगलश्च सा सैरेयकस्तु झिंटी स्यात्तस्मिन्कुरबकोऽरुणे ७६ पीता कुरंटको झिंटी त-
स्मिन्सहचरी द्वयोः ओड्रपुष्पं जपापुष्पं वज्रपुष्पं तिलस्य यत् ७७ प्रतीहासशतप्रा

अं॰ वल्यपि यासोयवासोदुःस्पर्शोधन्वयासःकुनाशकः ९१ रोदनीकच्छुरानंतासमुद्रांता
द्वि॰ दुरालभा पृश्निपर्णीपृथक्पर्णीचित्रपर्ण्यंघ्रिवल्लिका ९२ क्रोष्टुविन्नासिंहपुच्छी
१० कलशिर्धावनिःगुहा निदिग्धिकास्पृशीव्याघ्रीबृहतीकंटकारिका ९३ प्रचोदनी
कुलीक्षुद्रादुःस्पर्शाराष्ट्रिकेत्यपि नीलीकालाक्लीतकिकाग्रामीणामधुपर्णिका ९४
रंजनीश्रीफलातुत्थाद्रोणीदोलाचनीलिनी अवल्गुजःसोमराजीसुवल्लिःसोम
वल्लिका ९५ कालमेषीकृष्णफलावाकुचीपूतिफल्यपि कृष्णोपकुल्यावैदेही
मागधीचपलाकणा ९६ उषणापिप्पलीशौंडीकोलाथकरिपिप्पली कपिवल्लीको
लवल्लीश्रेयसीवशिरःपुमान् ९७ चव्यंतुचविकाकाकचिंचीगुंजेतुकृष्णला प १०

पील्लपर्ण्यपि पाठांवष्टाविद्धकर्णीस्थापणीश्रेयसीरसा ८५ एकाष्ठीलापापचे
लीप्राचीनावनतिक्तका कटुःकटंवराशोकरोहिणीकटुरोहिणी ८६ मत्स्यपित्ता
कृष्णभेदीचक्रांगीशकुलादिनी आत्मगुप्ताजहाव्यंगाकंडूराप्रावृषायणी ८७ ऋ
ष्यप्रोक्ताशूकशिंबिःकपिकच्छुश्चमर्कटी चित्रोपचित्रान्यग्रोधीद्रवंतीसंवरी
वृषा ८७ प्रत्यक्श्रेणीसुतश्रेणीचंडामूषकपर्ण्यपि अपामार्गःशैखरिकोधा
मार्गवमयूरकौ ८८ प्रत्यक्पर्णीकेशपर्णीकिणिहीखरमंजिरी हंजिकाब्रा
ह्मणीपद्माभार्गीब्राह्मणयष्टिका ८९ अंगारवल्लीबालेयशावर्वरवर्द्धकाः
मंजिष्ठाविकसाजिंगीसमंगाकालमेषका ९० मंडूकपर्णीभंडीरीभंडीयोजन

अ॰
टि॰
११

ग्रं:त्वक्क्षीरीत्वक्षीरीयवजा ५ समंगानडगाक्षोवेल्लममोघाचित्रतंडुला तंडुलश्चकृमि
घ्नश्चविडंगंपुंनपुंसकम् ६ बलावाट्यालकाघंटारवातुशणपुष्पिका मृद्वीकागोस्त
नीद्राक्षास्वाद्वीमधुरसेतिच ७ सर्वानुभूतिःसरलात्रिपुटात्रिवृतात्रिवृत् त्रिभंडी
रेचनीश्यामापालिंद्यौतुसुषेणिका ८ कालामसूरविदलार्द्धचंद्राकालमेषि
का मधुकंक्लीतकंयष्टीमधुकंमधुयष्टिका ९ विदारीक्षीरशुक्लेक्षुगंधाक्रोष्ट्री
तुयासिता अन्याक्षीरविदारीस्यान्महाश्वेतर्क्षगंधिका १० लांगलीशारदीतोय
पिप्पलीशकुलादनी खराश्वाकारवीदीप्योमयूरोलोचमस्तकः ११ गोपीश्यामा
शारिवास्यादनंतोत्पलशारिवा योग्यमृद्धिःसिद्धिलक्ष्म्यौवृद्धेरप्याह्वयाइमे ११

लंकषात्विक्षुगंधाश्वदंष्ट्रास्वादुकंटकः ९८ गोकंटकोगोक्षुरकोवनशृंगाटइत्य
पि विश्वाविषाप्रतिविषातिविषोपविषारुणा ९९ शृंगीमहौषधंचाथक्षीरा
वीदुग्धिकेसमे शतमूलीबहुसुताभीरुरिंदीवरीवरी १०० ऋष्यप्रोक्ताभीरुप
त्रीनारायण्यःशतावरी अहेरुरथपीतद्रुकालीयकहरिद्रवः १ दार्वीपंचपचा
दारुहरिद्रापर्जनीतिच वचोग्रगंधाषड्ग्रंथागोलोमीशतपर्विका २ शुक्लाहै
मवतीवैद्यमातृसिंह्यौतुवाशिका वृषोऽटरूषःसिंहास्योवासकोवाजिदंतकः ३
आस्फोतागिरिकर्णीस्याद्विष्णुक्रांतापराजिता इक्षुगंधातुकांडेक्षुःकोकिलाक्षे
क्षुरक्षुराः ४ शालेयःस्याच्छीतशिवश्छत्त्रामधुरिकामिसि मिश्रेयाप्यथसीहुंडोव

सेसे १९ तांबूलवल्लीतांबूलीनागवल्ल्यथद्विजा हरेणुरेणुकाकौंतीकपिलाभ

अ॰ द्वि॰ स्मगंधिनी २० एलवालुकमैलेयंसुगंधिहरिवालुकम् वालुकंचाथपालंक्यामु

२२ कुंदःकुंदरकुंदरू २१ वालंह्रीवेरबर्हिष्ठोदीच्यंकेशांबुनामच कालानुसार्यवृद्धा

श्मपुष्पशीतशिवानितु २२ शैलेयंतालपर्णीतुदैत्यागंधकुटीमुरा गंधिनीगजभ

क्ष्यातुसुवहासुरभीरसा २३ महेरणाकुंदरुकीसल्लकीह्लादिनीतिच अग्निज्वाला

सुभिक्षातुधातकीधातुपुष्पिका २४ पृथ्वीकाचंद्रवालैलानिष्कुटिर्बहुलाथसा

सूक्ष्मोपकुंचिकातुत्थाकोरंगीत्रिपुटात्रुटिः २५ व्याधिकुष्ठंपारिभाव्यंवाप्यंकलमु

त्पलम् शंखिनीचोरपुष्पीस्यात्केशिन्यथवितुन्नकः २६ झटामलाकटाताली। २२

कदलीवारणवुसारंभामोचांशुमत्फला काष्ठीलामुद्गपर्णीतुकाकमुद्गासहेत्य
पि २३ वार्ताकीहिंगुलीसिंहीभंटाकीदुष्प्रधर्षिणी नाकुलीसुरसानागसुगं
धागंधनाकुली २४ नकुलेष्टाभुजंगाक्षीछत्राकीसुवहाचसा विदारिगंधांशु
मतीशालपर्णीस्थिराध्रुवा २५ तुंडिकेरीसमुद्रांताकार्पासीवदरीति भारद्वाजी
तुसावन्याशृंगीतुऋषभोवृषा २६ गांगेरुकीनागबलाझषाह्रस्वगवेधुका धा
मार्गवोघोषकःस्यान्महाजालीसपीतकः २७ ज्योत्स्नीपटोलिकाजालीनादे
यीभूमिजंवुका स्याल्लांगलिकाग्निशिखाकाकांगीकाकनासिका २८ गोधा
पदीतुसुवहामुसलीतालमूलिका अजशृंगीविषाणीस्याद्गोजिह्वादार्विके

चंचोवंवर्मानकम् २४ कर्चूरकोद्राविडकःकाल्पःकोवेधमुख्यकः ओषध्योजा
अ॰ टि॰ तिमात्रेस्युरजातौसर्वमौषधं २५ शाकाख्यंपत्रपुष्पादितंडुलीयोल्पमारिषः वि
१३ शल्याग्निशिखानंताफलिनीशक्रपुष्प्यपि २६ स्याहक्षगंधाछगलांत्र्यावेगीवृद्ध
दारुकः जुंगोब्राह्मीतुमत्स्याक्षीवयस्थासोमवल्लरी २७ पटुपर्णीहैमवतीस्वर्णक्षी
रीहिमावती हयपुच्छीतुकांबोजीमाषपर्णीमहासहा २८ तुंडकेरीरक्तफला
बिंबिकापीलुपर्ण्यपि बर्बराकबरीतुंगीखरपुष्पाजगंधिका २९ एलापर्णीतुसु
वहारास्नायुक्तरसाचसा चांगेरीचुक्रिकादंतशठांबष्ठाम्ललोणिकाः ३० सहस्रवे
धीचुक्रोम्लवेतसःशतवेध्यपि नमस्कारीगंडकारीसमंगाखदिरेत्यपि ३१ जीवंती १३

शिवातामलकीति च प्रपौंडरीकः पौंडर्यमथ तुन्नकुवेरकः २७ कुणिकच्छः कांतल
कोनंदिवृक्षोथ राक्षसी चंडाधनहरीक्षेमदुष्पत्रगणहासकाः २८ व्याडायुधं व्या
घ्रनखं करजं चक्रकारकं सुषिराविद्रुमलताकपोतांघ्रिर्नटीनली धमन्यंजना
केशी च हनुर्हट्टविलासिनी शुक्तिः शंखः खुरः कोलदलं नखमथाढकी २९ का
क्षीमृत्स्नातुवरिकामृत्तालकसुराष्ट्रजे कुटंनटं दाशपुरं वानेयं परिपेलवम् ३१
प्लवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च ग्रंथिपर्णं शुकं बर्हिः पुष्पं स्थौणेयकुक्कुरे ३२
मरुन्मालातु पिशुनास्पृक्कादेवीलतालघुः समुद्रांतावधूः कोटिवर्षालंकोपि
केत्यपि ३३ तपस्विनीजटामांसीजटिलालोमशामिनी त्वक्पत्रमुत्कटं भृंगं त्व।

अ॰
टि॰
१४

द्वीवितन्नंहनिषल्ककम् स्याद्वातकःशीतलापराजिताशनपर्ण्यपि ४९ पारावतां
घ्रिःकटभीपण्याज्योतिष्मतीलता वार्षिकंत्रायमाणास्यात्त्रायंतीबलभद्रिका ५०
विष्वक्सेनप्रियागृष्टिःर्वाराहीबदरेत्यपि मार्कवोभृंगराजःस्यात्काकमाचीतुवा
यसी ५१ शतपुष्पासितछत्रातिछत्रामधुरामिसिः अवाक्पुष्पीकारवीचसरणा
तुप्रसारिणी ५२ तस्यांकटंभराराजबलाभद्रबलेतिच जनीजतूकारजनीजतु
कृच्चक्रवर्तिनी ५३ संस्पर्शाथशटीगंधमूलीषड्ग्रंथिकेत्यपि कर्चूरोपिपलाशो
थकारवेल्लःकठिल्लकः ५४ सुषवीचाथकुलकंपटोलस्तिक्तकःपटुः कूष्मां १४
डकस्तुकर्कारुरुर्वारुःकर्कटीस्त्रियौ ५५ इक्ष्वाकुःकटुतुंबीस्यात्तुंब्यलाबूरुभे

जीवनीजीवाजीवनीयामधुश्रवा कूर्चशीर्षोमधुकरः शृंगह्रस्वांगजीवका ४२
किराततिक्तोभूनिंबोनार्यतिक्तोयमस्तला विमलामातलाभूरिफेनाचर्मकषे
त्यपि ४३ वायसोलीस्वादुरसावयस्थायमकृत्फलकः निकुंभोदंतिकाप्रत्यक्श्रे
एयुडुंबरपर्ण्यपि ४४ अजमोदात्युग्रगंधाब्रह्मदर्भायवानिका मूलेपुष्करका
श्मीरपद्मपत्राणिपौष्करे ४५ अव्यथातिचरापद्माचारटीपद्मचारिणी कां
पिल्लः कर्कशश्चंद्रोरक्तांगोरोचनीत्यपि ४६ प्रपुन्नाडस्त्वेडगजोदद्रुघ्नश्चक्र
मर्दकः पद्माटउरणाख्यश्चपलाङ्गुस्तस्तकंटकः ४७ लताकडुईमौतत्रहरि
तेयमहौषधम् लशुनंगृंजनारिष्टमहाकंदरसोनकाः ४८ पुनर्नवावशोथ

अ॰ द्वि॰ ९५ वल्वजाः रसालइक्षुस्तद्भेदाः पुंड्रकांतारकादयः ९३ स्याद्वीरणं वीरतरं
मूलेस्योशीरमस्त्रियां अभयं नलदं सेव्यममृणालं जलाशयं ९४ लामज्जकं ल
घुलयमवदाहेष्टकापथे नलादयस्तृणं गर्मुत् श्यामाकप्रमुखा अपि ९५ अ
स्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् पौरं सौगंधिकं ध्यामदेवजग्धकरौ
हिषम् छत्रातिछत्रपालघ्नौ मालातृणकभूस्तृणे शष्पं बालतृणं घासो य
वसं तृणमर्जुनम् ९७ तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः तृणराजाह
यस्तालो नालिकेरस्तु लांगली ९८ घोंटा तु पूगः क्रमुको गुवाकः खपुरोस्य
तु फलमुद्वेगमेते च हिंतालसहितास्त्रयः ९९ खर्जूरः केतकी ताली खर्जूरी च
तृणद्रुमाः १०० इति वनौषधिवर्गः ४ ॥ सिंहो मृगेंद्रः पंचास्यो हर्यक्षः केस ९५

समे चित्रागवाक्षीगोडुंबीविशालात्विंद्रवारुणी ५६ अर्शोघ्नःसूरणःकंदोगं
डीरस्तुसमष्ठिला कलंब्युपोदिकास्त्रीतुमूलकंहिलमोचिका ५७ वास्तुकं
शाकभेदाःस्युर्दूर्वातुशतपर्विका सहस्रवीर्याभार्गव्योरुहानंताथसासिता ५८
गोलोमीशतवीर्याचगंडालीशकुलाक्षकः कुरुविंदोमेघनामामुस्तामुस्तक
मस्त्रियाम् ५९ स्याद्भद्रमुस्तकोगुंद्राचूडालाचक्रलोच्चटा वंशेत्वक्सारकर्मा
रत्वचिसारतृणध्वजाः ६० शतपर्वायवफलोवेणुमस्करतेजनाः वेणवः
कीचकास्तेस्युर्येस्वनंत्यनिलोद्धताः ६१ ग्रंथिर्नापर्वपरुषंगुंद्रस्तेजनकःशरः
नडस्तुधमनःपोटगलोथोकाशमस्त्रियाम् ६२ इक्षुगंधापोटगलःपुंसिभूम्नित

प्रियकावपि समूरश्चेतिहरिणाअमीअजिनयोनयः ९ कृष्णसाररुरुन्यं
अ॰ कुरंकुशंवररौहिषाः गोकर्णपृषतैणर्ष्यरोहिताश्चमरोमृगाः १० गंधर्वः
द्वि॰ शरभोरामःसृमरोगवयःशशः इत्यादयोमृगेंद्राद्याःगवाद्याःपशुजातयः ११
१९ उंदुरुर्मूषिकोप्याखुर्गिरिकाबालमूषिका छुछुंदरीगंधमूषीदीर्घदेहीरि
वोधिका सरटःकृकलासःस्यान्मुषलीगृहगोधिका १२ लूतास्त्रीतंतुवा
योर्णनाभमर्कटकाःसमाः नीलंगुस्तुकृमिःकर्णजलौकाशतपद्युभे १३
वृश्चिकःशूककीटःस्यादलिद्रोणौतुवृश्चिके पारावतःकलरवःकपोतौ
थशशादनः १४ पत्रीश्येनउलूकस्तुवायसारातिपेचकौ व्याघ्राटःस्या १९
द्भरद्वाजःखंजरीटस्तुखंजनः १५ लोहपृष्ठस्तुकंकःस्यादथचाषःकिकीदि

रीहरिः शार्द्दूलद्वीपिनौव्याघ्रेतरक्षुस्तुमृगादनः १ कपिप्लवंगप्लवगःशाखा
मृगवलीमुखाः मर्कटोवानरःकीशोवनौकाअथभल्लुके ऋक्षाच्छभल्लभल्लू
केगंडकेखड्गखड्गिनौ लुलायोमहिषोवाहद्विषत्कासरसैरिभाः ३ वराहःऽ
सूकरोघृष्टिःकोलःपोत्रीकिरःकिटिः दंष्ट्रीघोणीस्तब्धरोमाक्रोडोभूदारइत्य
पि ४ स्त्रियांशिवाभूरिमायुगोमायोमृगधूर्त्तका शृगालवंचकक्रोष्टुफेरुफे
रवजंबुकाः ५ ओतुर्विडालोमार्जारोवृषदंशकआखुभुक त्रयोगौधेरगौधार
गौधेयागोधिकात्मजे ६ श्वावित्तुशल्यस्तल्लोम्निशललीशललेशले वातप्र
मीर्वातमृगःकोकस्त्वीहामृगोवृकः ७ मृगेकुरंगवातायुहरिणाजिनयोन
यः ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभेत्रिषु ८ कदलीकंदलीचीनश्चमूरु

अ.
द्वि.
१२

कमः २३ राजहंसास्तुते चंचुचरणैर्लोहितैसिताः मलिनैर्म्मलिकाख्या-
स्तेधार्त्तराष्ट्राः सितेतरैः २४ शरारिराटिराटिश्चबलाकाबिसकंठिका हंस
स्ययोषिद्वरटीसारसस्यतलक्ष्मणा २५ जतुकाजिनपत्रास्यात्परोक्ष्णीतैल
पायिका वर्वणामक्षिकानीलासरघामधुमक्षिका २६ पतंगिकापुत्तिका
स्याद्दंशस्तुवनमक्षिका दंशीतज्जातिरल्पास्याद्गंधोलीवरटाद्वयोः २७ भृं-
गारीझीरुकाचीरीझिल्लिकाचसमाइमाः समौपतंगशलभौखद्योतोज्योति
रिंगणः २८ मधुव्रतोमधुकरोमधुलिण्मधुपालिनः द्विरेफपुष्पलिड्भृंग
षट्पदभ्रमरालयः २९ मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुक शिखा १२
वलः शिखीकेकीमेघनादानुलास्यपि ३० केकावाणीमयूरस्यसमौचंद्र-

विः कलिंगभृंगधूम्याटाअथस्याच्छतपत्रकः १६ दार्वाघाटोथसारंगस्तो
ककश्चातकःसमाः कृकवाकुस्ताम्रचूडःकुक्कुटश्चरणायुधः १७ चटकः
कलविंकःस्यात्तस्यस्त्रीचटकातयोः पुमपत्येचाटकैरःस्त्र्यपत्येचटकैवसा १८
कर्करेटुःकरेटुःस्यात्कृकणक्रकरौसमौ वनप्रियःपरभृतःकोकिलःपि
कस्त्वपि १९ काकेतुकरटारिष्टबलिपुष्टसकृत्प्रजाः ध्वांक्षात्मघोषप
रभृद्बलिभुग्वायसाअपि २० द्रोणकाकस्तुकाकोलोदात्यूहःकालकंठ
कः आतापिचिल्लौदाक्षाय्यगृध्रौकीरशुकौसमौ २१ क्रुङ्क्रौंचोथवकःपु
ष्कराह्वस्तुसारसः कोकश्चक्रश्चक्रवाकोरथांगाह्वयनामकः २२ कादं
वःकलहंसःस्यादुत्क्रोशकुररौसमौ हंसास्तुश्वेतगरुतश्चक्रांगामानसौ

अ॰ समूहनिवहव्यूहसंदोहविसरव्रजाः स्तोमौघनिकरव्रातवारसंघातसंचा-
द्वि॰ याः ३९ समुदायः समुदयः समवायश्चयो गणः स्त्रियां तु संहतिर्वृंदंनि
२८ कुरंबंकदंबकम् ४० वृंदभेदाः समैर्वर्गाः संघसार्थौ तु जंतुभिः सजातीय
कुलंयूथंतिरश्चांपुंनपुंसकं ४१ पशूनांसमजोन्येषांसमाजोथसधर्मिणां
स्यान्निकायः पुंजराशीतूत्करः कूटमस्त्रियां ४२ कपोतशौकमायूरतैत्ति-
रादीनितद्गणे गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ४३ इति सिंहा-
दिवर्गः ५ ॥ ॥ मनुष्या मानुषा मर्त्या मनुजा मानवा नराः स्युः पुमांसः
पंचजनाः पुरुषाः पूरुषा नरः १ स्त्री योषिदबला योषा नारी सीमंतिनी वधूः २८
प्रतीपदर्शिनी वामा वनिता महिला तथा २ विशेषास्त्वंगना भीरुः कामि-

कमेचकौ शिखाचूडः शिखंडस्तु पिछबर्हे नपुंसके ३१ खगेविहंगविहा
गविहंगमविहायसः शकुंतिपक्षिशकुनिशकुंतशकुनद्विजाः ३२ पत
पत्रि त्रिपतगपतत्पत्ररथांडजाः नगौकोवाजिविकिरविविष्किरपतत्रयः ३३ नी
डोद्भवागरुत्मंतः पित्संतोनभसंगमाः तेषांविशेषाहारीतोमद्गुःकारंड
वःप्लवः ३४ तित्तिरिःकुक्कुभोलावोजीवंजीवश्चकोरकः कोयष्टिकष्टि
ट्टिभकोवर्तकोवर्तिकादयः ३५ गरुत्पक्षच्छदाःपत्रंपतत्रंचतनूरुहम् ।
स्त्रीपक्षतिःपक्षमूलंचंचुस्त्रोटिरुभेस्त्रियौ ३६ प्रडीनोड्डीनसंडीनान्येताःख
गगतिक्रियाः पेशीकोशोद्विहीनेंडंकुलायोनीडमस्त्रियां ३७ पोतःपाको
र्भकोडिंभःपृथुकःशावकःशिशुः स्त्रीपुंसौमिथुनंद्वंद्वंयुग्मंतुयुगलंयुगं ३८

अ॰ द्वैरिणीपांसुलाचस्यादशिश्वीशिशुनाविना अवीरानिष्पतिसुताः विश्वस्ता
द्वि॰ विधवेसमे ११ आलिःसखीवयस्याथपतिवत्नीसभर्तृका वृद्धापलिक्नीप्रा
१९ ज्ञीतुप्रज्ञाप्राज्ञातुधीमती १२ शूद्रीभार्यास्याच्छूद्रातज्जातिरंगना ^आभीरीतु शूद्रस्य
महाशूद्रीजातिपुंयोगयोःसमाः १३ आर्याणीस्वयमर्यास्यात्क्षत्रियाक्षत्रिया
ण्यपि उपाध्यान्युपाध्यायीपोटास्त्रीपुंसलक्षणा १४ वीरपत्नीवीरभार्यावी
रमातातुवीरसूः जातापत्याप्रजाताचप्रसूताचप्रसूतिका १५ स्त्रीनग्निकाको
टवीस्याद्दूतीसंचारिकेसमे कात्यायन्यर्धवृद्धायाकाषायवसनाधवा ७ सै
रंध्रीपरवेश्मस्थास्ववशाशिल्पकारिका असिक्नीस्यादवृद्धायाप्रेष्यांतःपुरा १९
चारिणी १८ वारस्त्रीगणिकावेश्यारूपाजीवाथसाजनैः सत्कृतावारमुख्या

नीकमललोचना प्रमदामानिँकांताललनाचनितंबिनी ३ सुंदरीरमणीरा
माकोपनासैवभामिनी वरारोहामत्तकाशिन्युत्तमावरवर्णिनी ४ कृता
भिषेकमहिषीभोगिन्योन्यानृपस्त्रियः पत्नीपाणिगृहीतीचद्वितीयासहधर्मि
णी ५ भार्याजायाथपुंभूम्निदाराःस्यात्तुकुटुंबिनी पुरंध्रीसुचरित्रासतुसतीसा
ध्वीपतिव्रता ६ कृतसापत्निकाध्यूढाधिविन्नाथस्वयंवरा पतिंवराचवा
र्याथकुलस्त्रीकुलपालिका ७ कन्याकुमारीगौरीतुनग्निकानागतार्तवा
स्यान्मध्यमादृष्टरजास्तरुणीयुवतिस्समे ८ समाःस्नुषाजनीवध्वश्चिरंटी
तुसुवासिनी इच्छावतीकामुकास्याद्वृषस्यंतीतुकामुकी ९ कांतार्थिनी
तुयायातिसंकेतंसाभिसारिका पुंश्चलीधर्षिणीबंधक्यसतीकुलटेत्वरी १०

अ॰ द्वि॰ २०

जः आत्मजःस्तनयःसूनुःसुतःपुत्रःस्त्रियांत्वमी २७ आहुर्दुहितरंसर्वेपत्यंतो
कंतयोःसमे स्वजातेत्वौरसोरस्यौ तातस्तुजनकःपिता २८ जनयित्रीप्रसूर्माता
जननीभगिनीस्वसा ननांदातुस्वसापत्युर्नप्त्रीपौत्रीसुतात्मजा २९ भार्यास्तु
भ्रातृवर्गस्ययातरःस्युःपरस्परम् प्रजावतीभ्रातृजायामातुलानीतुमातुली ३०
पतिपत्न्योःप्रसूःश्वश्रूःश्वशुरस्तुपितातयो पितुर्भ्रातापितृव्यःस्यान्मातुर्भ्रातातुमा
तुलः ३१ श्यालाःस्युर्भ्रातरःपत्न्याःस्वामिनोदेवृदेवरौ स्वस्रीयोभागिनेयःस्या
ज्जामातादुहितुःपतिः ३२ पितामहःपितृपितातत्पिताप्रपितामहः मातुर्माता
महाद्येवंसपिंडास्तुसनाभयः ३३ समानोदर्यसोदर्यसगर्भ्यःसहजाःसमाः सगो २०
त्रबांधवज्ञातिबंधुस्वस्वजनाःसमाः ३४ ज्ञातेयंबंधुतातेषांक्रमाद्भावसमूह

स्यात्कुट्टनीशंभलीसमे १९ विप्रश्निकात्वीक्षणिकादैवज्ञाथरजस्वला स्त्री
धर्मिण्यविरात्रेयीमलिनीपुष्पवत्यपि २० ऋतुमत्यप्युदक्याच स्याद्रजःपुष्प
मार्तवम् श्रद्धालुर्दोहदवतीनिष्कलाविगतार्तवा २१ आपन्नसत्वास्याद्गुर्वि
ण्यंतर्वत्नीचगर्भिणी गणिकादेस्तुगाणिक्यंगार्भिणंयौवतंगणे २२ पुनर्भूर्दि
धिषूरूढाद्विस्तस्यादिधिषुःपतिः सतुद्विजोग्रेदिधिषूःसैवयस्यकुटुंबिनी २३
कानीनःकन्यकाजातःसुतोथसुभगासुतः सौभागिनेयःस्यात्पारस्त्रैणेय
स्तुपरस्त्रियाः २४ पैतृष्वस्रेयःस्यात्पैतृष्वस्रीयश्चपितृष्वसुः सुतोमातृष्वसुश्चै
वंवैमात्रेयोविमातृजः २५ अथबांधकिनेयःस्याद्बंधुलश्चासतीसुतः कौलटे
यःकौलटेरोभिक्षुकीतुसतीयदि २६ तदाकौलटिनेयोस्याःकौलटेयोपिचात्म

अ॰
टि॰
२१

मीज्यायान्पूर्वजस्त्वग्रियोग्रजः जघन्यजेस्युःकनिष्ठयवीयोवरजानुजाः ४३
अमांसोदुर्बलश्छातोबलवान्मांसलोंसलः तुंदिलस्तुंदिभस्तुंदीबृहत्कुक्षिःपिचं
डिलः ४४ अवटीटोवनाटश्चावभ्रटोनतनासिके केशवःकेशिकःकेशीवलिनोव
लिभःसमौ ४५ विकलांगस्त्वपोगंडः खर्वोह्रस्वश्चवामनः खरणाःस्यात्खरण
सोविग्रोविगतनासिकः ४६ खुरणाःस्यात्खुरणसःप्रज्ञुःप्रगतजानुकः ऊर्द्धज्ञु
रूर्द्धजानुःस्यात्संज्ञुःसंहतजानुकः ४७ स्यादेडेबधिरःकुब्जेगडुलःकुकरेकु
णिः पृश्निरल्पतनौश्रोणः पंगौमुंडस्तुमुंडिते ४८ वलिरःकेकरेखोडेखंजः
त्रिषुजरावराः जडुलःकालकःपिप्लुस्तिलकस्तिलकालकः ४९ अनामयं २१
स्यादारोग्यंचिकित्सारुक्प्रतिक्रिया भेषजौषधभैषज्यान्यगदोजायुरित्यपि ५० स्त्री

योः धवः प्रियः पतिर्भर्त्ता जारस्तूपपतिः समौ ः ३५ अमृते जारजः कुण्डो मृ
ते भर्त्तरि गोलकः भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ३६ मातापि
तरौ पितरौ मातरपितरौ च तातजननपित्रौ श्वश्रूश्वशुरौ श्वशुरौ दुहितापुत्रश्च पु
त्रौ च ३७ दंपती जंपती जायापती भर्यापती च तौ गर्भाशयो जरायुः स्यादुल्वं च क
ललो स्त्रियां ३८ सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ तृतीयाप्रकृतिः षंढः
क्लीवः पंडो नपुंसकम् ३९ शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे स्यात्स्था
विरं तु वृद्धत्वं वृद्धसंघे तु वार्द्धकम् ४० पलितं जरसा शौक्ल्यं केशादौ विस्रसा ज
रा स्यादुत्तानशया डिंभा स्तनपाश्च स्तनंधयी ४१ बालस्तु स्यान्माणवको वयः
स्थस्तरुणो युवा प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरः त्रयः ४२ वर्षीयान्दश

अ॰ द्वि॰ २२

भ्यांतः समौ पामनकच्छुरौ ५८ दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतोऽर्शसः वातकी
वातरोगी स्यात्सातिसारोऽतिसारकी ५९ स्युः क्लिन्नाक्षे चिल्लचुल्लपिल्लाः क्लिन्नेऽक्ष्णि
चाप्यमी उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी ६० न्युब्जो भुग्ने रुजा वृद्ध
नाभौ तुन्दिलतुन्दिभौ किलासी सिध्मलोऽन्धोऽदृक् मूर्च्छाले मूर्त्तमूर्च्छितौ ६१ शुक्रं तेजो
रेतसी च बीजवीर्येंद्रियाणि च मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा ६२
पिशितं तरसं मांसं पललं क्रव्यमामिषम् उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिंग
कम् ६३ रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् बुक्काग्रमांसं हृदयं हृन्मे
दस्तु वपा वसा ६४ पश्चाद्ग्रीवाशिरा मन्या नाडी तु धमनिः शिरा तिलकं क्लोम २२
मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियां ६५ अंत्रं पुरीतद्गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ।

रुग्जा चोपतापरोगव्याधिगदामयाः पुमान्यक्ष्मा क्षयः शोषः प्रतिश्यायस्तु पी
नसः ५१ स्त्रीक्षुत्क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् शोफस्तु श्वयथुः शोथः
पादस्फोटो विपादिका ५२ किलाससिध्मे कच्छ्वां तु पामपामे विचर्चिका कंडूः ख
र्जूश्च कंडूया विस्फोटः पिटकस्त्रियः ५३ व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः
पुमान् कोठो मंडलकं कुष्ठश्वित्रे दुर्नामकार्शसी ५४ आनाहस्तु विबंधः स्या
द्ग्रहणीरुक्प्रवाहिका प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ५५ व्या
धिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः अश्मरी मूत्रकृच्छ्रं स्यात् पूर्वे शुक्रावधेस्त्रिषु ५६
रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके वार्त्तो निरामयः कल्य उल्लाघो निर्ग
तो गदात् ५७ ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः आतुरोऽभ्यमितो

अ॰ टि॰ २२

कटिःश्रोणिःककुद्मती पश्चान्नितंवःस्त्रीकट्याःक्लीवेतुजघनंपुरः ७४ कूपकौ
तुनितंवस्थौद्वयहीनेकुकुंदरे स्त्रियांस्फिचौकटिप्रोथावुपस्थोवक्ष्यमाणयोः ७५
भगंयोनिर्द्वयोःशिश्नोमेढ्रोमेहनशेफसी मुष्कोऽंडकोशोवृषणःपृष्ठंवंशाधरंत्रि
कम् ७६ पिचंडकुक्षीजठरोदरंतुंदंस्तनौकुचौ चूचुकंतुकुचाग्रंस्यान्ननाक्रोडंभु
जांतरं ७७ उरोवत्संचवक्षश्चपृष्ठंतुचरमंतनोः स्कंधोभुजशिरोंऽसो ऽस्त्रीसंधीतस्यै
वजत्रुणी ७८ बाहुमूलेउभेकक्षौपार्श्वमस्त्रीतयोरधः मध्यमंचावलग्नंचमध्यो
ऽस्त्रीद्वौपरौद्वयोः ७९ भुजबाहूप्रवेष्टोदोः स्यात्कफोणिस्तुकूर्परः अस्योप
रिप्रगंडःस्यात्प्रकोष्ठस्तस्यचाप्यधः ८० मणिबंधादाक २३
निष्ठंकरस्यकरभोवहिः पंचशाखःशयःपाणिस्तर्जनीस्यात्प्रदेशिनी ८१

स्नायुस्त्रियांकालखंडयकृतौतुसमेइमे ६६ सृणिकास्यंदिनीलालादूषिकाने
त्रयोर्म्मलं मूत्रंप्रस्रावउच्चारावस्करौशमलंशकृत् ६७ पुरीषंगूथवर्चस्कम
स्त्रीविष्टाविशौस्त्रियौ स्यात्कर्प्परःकपालोस्त्रीकीकसंकुल्यमस्थिच ६८ स्याच्छ
रीरास्थ्निकंकालःपृष्ठास्थ्नितुकशेरुका शिरोस्थिनिकरोटीःस्त्रीपार्श्वास्थनि
तुपार्श्वका ६९ अंगंप्रतीकोवयवोपघनोथकलेवरं गात्रंवपुःसंहननंशरी
रंवर्ष्मविग्रहः ७० कायोदेहःक्लीवपुंसोःस्त्रियांमूर्त्तिस्तनुस्तनूः पादाग्रंप्र
पदंपादःपदंघ्रिश्चरणोस्त्रियां ७१ तद्ग्रंथीघुटिकेगुल्फौपुमान्पार्ष्णिस्तयोः
जंघातुप्रसृताजानूरुपर्वाष्ठीवदस्त्रियाम् ७२ सक्थिक्लीबेपुमानूरुस्तत्संधिः
पुंसिवंक्षणः गुदंत्वपानंपायुर्नावस्तिर्नाभेरधोद्वयोः ७३ कटोनाश्रोणिःफलकं

अ॰
टि॰
२४

वेश्माणिगंधवहाघोणानासाचनासिका ८९ ओष्ठाधरौतुरदनछदौदश
नवाससी अधस्ताच्चिवुकंगंडौकपोलौतत्परोहनुः ९० रदनादशना
दंतारदास्तालुतुकाकुदं रसज्ञारसनाजिह्वाप्रांतावोष्ठस्यसृक्कणी ९१
ललाटमलिकंगोधिरूर्द्धेदृग्भ्यांभ्रुवौस्त्रियौ कूर्चमस्त्रीभ्रुवोर्मध्यंतारका
त्ताः कनीनिका ९२ लोचनंनयनंनेत्रमीक्षणंचक्षुरक्षिणी दृग्दृष्टीचा
स्रंनेत्रांवुरोदनंचास्रमश्रुच ९३ अपांगौनेत्रयोरंतौकटाक्षोपांगदर्शने
कर्णौशब्दग्रहौश्रोत्रंश्रुतिस्त्रीश्रवणंश्रवः ९४ उत्तमांगंशिरःशीर्षंमूर्द्धा
नामस्तकोस्त्रियां चिकुरःकुंतलोवालःकचःकेशःशिरोरुहः ९५ त
द्वृंदेकैशिकंकैश्यमलकाश्चूर्णकुंतलाः तेललाटेभ्रमरकाःकाकपक्षः २४

अंगुल्यःकरशाखास्युःपुंस्यंगुष्टप्रदेशिनी मध्यमानामिकाचापिकनिष्टाचे
तिताःक्रमात् ८२ पुनर्भवःकररुहोनखोस्त्रीनखरोस्त्रियाम् प्रादेशताल
गोकर्णास्तर्जन्यादियुतेतते ८३ अंगुष्टेसकनिष्टेस्याद्वितस्तिर्द्वादशांगुलः
पाणौचपेटप्रतलप्रहस्ताविस्तृतांगुलौ ८४ द्वौसंहतौसंहतलप्रतलौवाम
दक्षिणौ पाणिर्निकुब्जःप्रसृतिस्तौयुतावंजलिःपुमान् ८५ प्रकोष्टे
विस्तृतकरेहस्तोमुष्ट्यातुबद्धया सरत्निःस्यादरत्निस्तुनिष्कनिष्टेनमुष्टिना ८६
व्यामोबाह्वोःसकरयोस्ततयोस्तिर्यगंतरम् ऊर्द्धविस्तृतदोःपाणिनृमानेपौरु
षंत्रिषु ८७ कंठोगलोथग्रीवायांशिरोधिःकंधरेत्यपि कंबुग्रीवात्रिरेखासा
वटुर्घाटाकृकाटिका ८८ वक्रास्येवदनंतुंडमाननंलपनंमुखम् क्ली

लंतिका स्वर्णैः प्रालंबिकाथोरःसूत्रिका मौक्तिकैः कृता ४ हारो मुक्ताव
अ॰ लीदेवछंदोसौ शतयष्टिका हारभेदा यष्टिभेदाद्गुछगुछार्द्धगोस्तनाः ५ अ
टि॰ र्द्धहारो माणवक एकावल्येकयष्टिका सैव नक्षत्रमाला स्यात्सप्तविंशतिमौ
२५ क्तिकैः ६ आवापकः पारिहार्यः कटको वलयोस्त्रियां केयूरमंगदं तुल्ये
अंगुलीयकमूर्मिका ७ साक्षरांगुलमुद्रा स्यात्कंकणं करभूषणं स्त्रीक-
ट्यां मेखला कांची सप्तकी रसना तथा ८ क्लीबे सारसनं चाथ पुंस्कट्यां शृं
खलं त्रिषु पादांगदं तुलाकोटिर्मंजीरो नूपुरोस्त्रियां ९ हंसकः पादकटा-
कः किंकिनी क्षुद्रघंटिका त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दशस्त्रिषु १० २५
वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् कौशेयं कृमिकोशोत्थं रांक

शिखंडिकः ९६ कवरीकेशवेशोथधम्मिलः संयताः कचाः शिखाचूडाके
शपाशीव्रतिनस्तुसटाजटा ९७ वेणिप्रवेणीशीर्षण्यशिरस्यौविशदेकचे
पाशःपक्षश्चहस्तश्चकलापार्थाःकचात्परे ९८ तनूरुहंरोमलोमतद्वृ
द्धौश्मश्रुपुंमुखे आकल्पवेषौनेपथ्यंप्रतिकर्मप्रसाधनं ९९ दशैतेत्रिष्व
लंकर्तालंकरिष्णुश्चमंडितः प्रसाधितोलंकृतश्चभूषितश्चपरिष्कृतः १००
विभ्राड्भ्राजिष्णुरोचिष्णूभूषातुस्यादलंकृता अलंकारस्त्वाभरणंपरिष्का
रोविभूषणं १ मंडनंचाथमुकुटंकिरीटंपुंनपुंसकं चूडामणिःशिरोरत्नं
तरलोहारमध्यगः २ बालपाश्यापारितथ्यापत्रपाश्याललाटिका कर्णि
कातालपत्रंस्यात्कुंडलंकर्णवेष्टकम् ३ ग्रैवेयकंकंठभूषालंबमानालं

अ. द्वि. २६

नंतत्प्राप्नोत्याप्रपदंहियत् १९ अस्त्रीवितानमुल्लोचोदूष्याद्यंवस्त्रवेश्मनि प्रतिसी
राजवणिकास्यात्तिरस्करिणीचसा २० परिकर्मांगसंस्कारःस्यान्मार्ष्टिर्मार्ज्ज
नामृजा उद्वर्तनोत्सादनेद्वेसमेआप्लावआप्लवः २१ स्नानंचर्चातुचार्चिक्यंस्था
सकोथप्रबोधने अनुबोधःपत्रलेखापत्रांगुलिरिमेस्त्रियां २२ तमालपत्र
तिलकचित्रकाणिविशेषकम् द्वितीयंचतुरीयंचनस्त्रियामथकुंकुमम् २३
काश्मीरजन्माग्निशिखंवरंबाह्लीकपीतने रक्तसंकोचपिशुनंधीरंलोहितचंद
ने २४ लाक्षाराक्षाजतुक्लीवेयावालक्तोद्रुमामयः लवंगंदेवकुसुमंश्रीसंज्ञम
थजायकम् २५ कालीयकंचकालानुसार्य्यंचथसमार्थकम् वंशिकागुरु २६
राजार्हंलोहंकृमिजजोंगकम् २६ कालागुर्वगुरुस्यात्तुमंगल्यामल्लिगंधव

देऽभ्रगरोवमर्दने ११ अनाहतं निष्प्रवाणि तंत्रकं च नवांबरे तत्स्यादुद्गमनी।
यं यद्धौतयोर्वस्त्रयोर्युगं १२ पत्रोर्णं धौतकौशेयं बहुमूल्यं महाधनं क्षौमं दुकू
लं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु १३ स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः दैर्घ्य
मायाम आनाहः परिणाहो विशालता १४ पटच्चरं जीर्णवस्त्रं समौ नक्तककर्प
टौ वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् १५ सुचेलकः पटोऽस्त्री व
राशिः स्थूलशाटकः निचोलः प्रच्छदपटः समौ रल्लककंबलौ १६ अंतरीयोपसं
व्यानपरिधानान्यधोंऽशुके द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा १७ संव्या
नमुत्तरीयं च चोलः कूर्पासको स्त्रियां १८ नीशारः स्यात्प्रावरणे हिमानिला
निवारणे १९ अर्द्धोरुकं वरस्त्रीणां स्याच्चंडातकमंशुकं स्यात्त्रिष्वाप्रपदीनं

अ॰ प्रच्छदकविशालेविथोत्नृतमंतललामकम् २५ प्रालंबमृजुलंबिस्यात्कंठाद्वैकक्ष
टि॰ कंतुतत् यत्तिर्यक्क्षिप्तमुरसीशिखास्वापीडशेखरौ २६ रचनास्यात्परिस्पं
२२ दःआभोगःपरिपूर्णता उपधानंतूपबर्हःशय्यायांशयनीयवत् २७ शयनंमं
चपर्यंकपल्यंकाःखट्वयासमाः गेंडुकःकंदुकोदीपःप्रदीपःपीठमासनम् २८
समुद्गकःसंपुटकःप्रतिग्राहःपतद्ग्रहः प्रसाधनीकंकतिकापिष्टातःपटवा
सकः २९ दर्पणेमुकुरादर्शौव्यजनंतालवृंतकम् ३० ॥ ॥ इतिनृवा
र्गः ६ संततिर्गोत्रजननकुलान्यभिजनान्वयौ वंशोन्ववायःसंतानोवर्णाःस्युर्ब्रा
ह्मणादयः १ राजबीजीराजवंश्योबीज्यस्तुकुलसंभवः महाकुलकुली २२
नार्यसभ्यसज्जनसाधवः २ ब्रह्मचारीगृहीवानप्रस्थोभिक्षुश्चतुष्टये आश्र

त. यक्षधूपः सर्जरसोरालसर्वरसावपि २७ बहुरूपोप्यथ वृकधूपकृत्रिमधू
पकौ तुरुष्कः पिंडकः सिंह्लो यावनोप्यथ पायसः २८ श्रीवासो वृकधूपोपि श्री
वेष्टसरलद्रवम् मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकं २९ कक्कोलकं को
शफलमथ कर्पूरमस्त्रियां घनसारश्चंद्रसंज्ञः सिताभ्रो हिमवालुका ३० गंध
सारो मलयजो भद्रश्रीश्चंदनोस्त्रियां तैलपर्णिकगोशीर्षे हरिचंदनमस्त्रियां ३१
तिलपर्णी तु पत्रांगं रंजनं रक्तचंदनं कुचंदनं चाथ जातीकोशजातीफले समे ३२
कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः गात्रानुलेपनी वर्त्तिर्वर्णकं स्याद्विले
पनम् ३३ चूर्णानि वासयोगाः स्युः भावितं वासितं त्रिषु संस्कारो गंधमाल्या
द्यैर्यः स्यात्तदधिवासनम् ३४ माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः

अ. व्रताचारा मिथः सब्रह्मचारिणः ॥ सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचि
द्वि. त् ॥ ११ ॥ पारंपर्योपदेशे स्यादैतिह्यमितिहाव्ययं ॥ उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारं
२८ भ उपक्रमः ॥ १२ ॥ यज्ञः सवोऽध्वरो यागः सप्ततंतुर्मखः क्रतुः ॥ पाठो होमश्चातिथी
नां सपर्या तर्पणं बलिः ॥ १३ ॥ एते पंच महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ समा
ज्या परिषद्गोष्ठी सभा समिति संसदः ॥ १४ ॥ आस्थानी क्लीबमास्थानं स्त्रीनपुंस
कयोः सदः ॥ प्राग्वंशः प्राग्घविर्गेहात्सदस्या विधिदर्शिनः ॥ १५ ॥ सभासदः सभा
स्ताराः सभ्याः सामाजिकाश्च ते ॥ वेदिः परिष्कृता भूमिः समे स्थंडिलचत्वरे ॥ १६ ॥ चं
षालो यूपकटकः ॥ कुंबा सुगहनावृतिः ॥ यूपाग्रं तर्म निर्मंथ्यदारुणि त्वरणिर्द्वयोः ॥ २८
॥ दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ अग्नित्रयमिदं त्रेता प्रणीतः संस्कृतो

मोखो द्विजात्यग्रजन्मभूदेववाडवाः ॥३॥ विप्रश्च ब्राह्मणोसौ षट्कर्मा यागा
दिभिर्वृतः ॥ विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ॥४॥ धीरो मनीषी ज्ञः प्रा
ज्ञः संख्यावान्पंडितः कविः ॥ धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ॥५॥ दूरद
र्शी दीर्घदर्शी श्रोत्रियच्छांदसौ समौ ॥ उपाध्यायोध्यापकोथ सनिषेकादिकृद्गु
रुः ॥६॥ मंत्रव्याख्याकृदाचार्यः आदेष्टा त्वध्वरे व्रती ॥ यष्टा ॥ च यजमानश्च स सो॥
मवति दीक्षितः ॥७॥ इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान् ॥ स गीष्पती॥
ष्ट्या स्थपतिः सोमपीथी तु सोमपाः ॥८॥ सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षि
णः ॥ अनूचानः प्रवचने सांगेधीती गुरोस्तु यः ॥९॥ लब्धानुज्ञः समावृत्तः सुत्वा॥
त्वभिषवे कृते ॥ छात्रांतेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः ॥१०॥ एकब्रह्म

अ॰ द्वि॰ २९

तादिकर्मणि ॥ २६ ॥ अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ त्यागो विहापितं
दानमुत्सर्जनविसर्जने ॥ २७ ॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनं ॥ प्रादेश
नं निर्वपनमपवर्जनमंहतिः ॥ २८ ॥ मृतार्थं तदहर्दाने त्रिषु स्यादौर्ध्वदेहिकम् ॥
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः ॥ २९ ॥ अन्वाहार्यं मासिकेंशोष्टमो
ह्नः कुतपोस्त्रियाम् ॥ पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ॥ ३० ॥ सनिस्त्व
ध्येषणा याच्ञाभिशस्तिर्याचनार्थना ॥ षट्तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वा
रिणि ॥ ३१ ॥ क्रमादातिथ्यातिथेये अतिथ्यर्थेत्र साधुनि ॥ स्यादावेशिक आगंतु
रतिथिर्ना गृहागते ॥ ३२ ॥ पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ॥ वरिवस्या
तु शुश्रूषा परिचर्याप्युपासनम् ॥ व्रज्याटाट्या पर्यटनं चर्या त्वीर्यापथे स्थितिः ॥ ३३ ॥ २९

नलः ॥ २८ ॥ समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ यो गार्हपत्यादानी-
यदक्षिणाग्निः प्रणीयते ॥ २९ ॥ तस्मिन्नारायणोग्न्यग्रायाग्रेयी स्वाहचहूतनश्च विद्यया ॥ अ-
क्तामथेनीधाय्याच यास्यादग्निमसमिंदने ॥ ३० ॥ गायत्रीसम्प्रवंछंदो हव्यपाके
च सेपुमान् ॥ अमित्रामस्पाश्नूत्सोसेयात्नीदेस्यादधियोगतः ॥ ३१ ॥ पवित्रेव्यजनं
तद्यद्वविंतेमृगचर्मणा ॥ पृषदाज्यसदध्याज्येपरमान्नेत्वपायसे ॥ ३२ ॥ हव्यका-
व्येदैवपित्रोम्नव्रेपात्रेस्रुवादिकं ॥ ध्रुवोपभृज्जुहूर्नातस्फ्वोभेदाः स्रुवः स्रुचः ॥ ३३ ॥
॥ उपहूतः पश्वरसौयोभिमेत्यक्रतोहतः ॥ परं पराक्रेशामनं प्रोक्षणं चवदार्थकं ॥ ॥ ३४ ॥
॥ वाच्यलिंगाप्रमीतोपसंपन्नप्रोक्षणताहते ॥ स्वावाप्यहविरग्नेतद्धृतंत्रिश्रवषट्।
कृतं ॥ ३५ ॥ दीवातोबभृतोयस्तेतत्कर्मार्हतयचियम् ॥ त्रिषयक्रतकर्मैषपूर्तंत्वा

अ॰ यग्रामा यतिनो यतयश्च ते ॥४१॥ यः स्थंडिले व्रतवशाच्छेते स्थंडिलशाय्यसौ ॥ स्थां
द्वि॰ डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः ॥४२॥ पवित्रः प्रयतः पूतः पाखंडाः सर्वलिं
३० गिनः ॥ पालाशदंडआषाढो व्रते राभस्तु वैणवः ॥४३॥ अस्त्रीकमंडलुः कुंडी व्रतिना
मासनं वृषी ॥ अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदंबकं ॥४४॥ स्वाध्यायः स्याज्जपः
सुत्याभिषवः सवनं च सा ॥ सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणं ॥४५॥ दर्शश्च पौर्णि
मासश्च यागौ पक्षांतयो पृथक् ॥ शारीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥४६॥ निय
मस्तु स यत्कर्म नित्यमागंतुसाधनं ॥ उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥४७॥ प्रा
चीनावीतमन्यस्मिन्निवीतं कंठलंवि यत् ॥ अंगुल्यग्रे तीर्थं दैवं स्वल्पांगुल्योर्मूले
कायम् ॥४८॥ मध्येंगुष्ठांगुल्योः पित्र्यं मूले त्वंगुष्ठस्य ब्राह्मणं ॥ स्याद्ब्रह्मभूयं ब्रह्म २॰

उपस्पर्शस्त्वाचमनमथमौनमभाषणं । आनुपूर्वी स्त्रियांवावृत्परिपाटीअनु
क्रमः ३४ पर्यायश्चातिपातस्तुस्यात्पर्ययउपात्ययः नियमोव्रतमस्त्रीतच्चो
पवासादिपुण्यकम् ३५ औपवस्तंतूपवासोविवेकःपृथगात्मता स्याद्ब्रह्मवर्च
संवृत्ताध्ययनर्द्धिरथांजलिः ३६ पाठेब्रह्मांजलिःपाठेविप्रुषोब्रह्मबिंदवः ध्या
नयोगासनेब्रह्मासनंकल्पेविधिक्रमौ ३७ मुख्यःस्यात्प्रथमःकल्पोनुकल्प
स्तुततोधमः संस्कारपूर्वंग्रहणंस्यादुपाकरणंश्रुते ३८ समेतुपाद
ग्रहणमभिवादनमित्युभे भिक्षुःपरिव्राट्कर्मंदीपाराशर्यपिमस्करी ३९
तपस्वीतापसःपारिकांक्षीवाचंयमोमुनिः तपःक्लेशसहोदान्तःवर्णिनो
ब्रह्मचारिणः ४० ऋषयःसत्यवचसःस्नातकस्त्वाप्लुतोव्रती येनिर्जितेंद्रि

अ॰ द्वि॰ ३१

पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः १ राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः चक्रव
र्त्ती सार्वभौमो नृपोन्यो मंडलेश्वरः २ येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः शास्ति
यश्चाज्ञया राज्ञः स सम्राडथ राजकं ३ राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्
मंत्री धीसचिवोमात्योन्ये कर्मसचिवास्ततः ४ महामात्राः प्रधानानि पुरोधास्तु पु
रोहितः द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ५ प्रतीहारो द्वारपालद्वास्थ
द्वाःस्थितदर्शकाः रक्षिवर्गस्त्वनीकस्थोथाध्यक्षाधिकृतौ समौ ६ स्थायुको
धिकृतो ग्रामे गोपो ग्रामेषु भूरिषु भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्कि
कः ७ अंतःपुरे त्वधिकृतः स्यादंतर्वंशिको जनः सौविदल्लाः कंचुकिनः स्था ३१
पत्याः सौविदाश्च ते ८ षंढो वर्षवरस्तुल्यौ सेवकार्थ्यनुजीविनः विषयानं

त्वंब्रह्मसायुज्यमित्यपि ४९ देवभूयादिकंतद्वत्कृछ्रंसांतपनादिकम् सन्या
सवत्यनशनेपुमान्प्रायोथवीरहा ५० नष्टाग्निःकुहनालोभान्मिथ्येर्यापथक
ल्पनाव्रात्यःसंस्कारहीनस्यादस्वाध्यायोनिराकृतिः ५१ धर्मध्वजीलिंगवृत्ति
रवकीर्णीक्षतव्रतः सुप्तेयस्मिन्नस्तमेतिसुप्तेयस्मिंनुदेतिच ५२ अंशुमा
नभिनिर्मुक्ताभ्युदितौचयथाक्रमात् परिवेत्तानुजोनूढेज्येष्ठेदारपरिग्रहात् ५३
परिवित्तिस्तुतज्ज्यायान्विवाहोपयमौसमौ तथापरिणयोद्वाहोपयामाःपा
णिपीडनं ५४ व्यवायोग्राम्यधर्मोमैथुनंनिधुवनंरतं त्रिवर्गोधर्मकामार्थैश्चतु
र्वर्गःसमोक्षकैः सबलैस्तैश्चतुर्भद्रंजन्याःस्निग्धावरस्यये ५५ ॥ ॥ इतिब्र
ह्मवर्गः ७ ॥ ॥ मूर्द्धाभिषिक्तोराजन्योबाहुजःक्षत्रियोविराट् राजाराट्

अ॰ द्वि॰ ३३ इत्यपि स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च १७ राज्यांगानि प्रकृतयः पौर
णां श्रेणयोपि च संधिर्न्ना विग्रहो यानमासनं द्वैधमाश्रयः १८ षड्गुणाः शक्तय
स्तिस्रः प्रभावोत्साहमंत्रजाः क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां १९
स प्रतापः प्रभावश्च यत्तेजः कोषदंडजं सामदानभेददंडा इत्युपायचतुष्टयं २०
साहसं तु दमो दंडः साम सांत्वमथो समौ भेदोपजापावुपधा धर्माद्यैर्यत्परीक्ष
णं २१ पंच त्रिषु षडक्षीणो यस्तृतीयाद्यगोचरः विविक्तविजनच्छन्ननिःशलाका
स्तथा रहः २२ रहश्चोपांशु चालिंगे रहस्यं तद्भवे त्रिषु समौ विस्रंभविश्वासौ भ्रे
षो भ्रंशो यथोचितात् २३ अभ्रेषन्यायकल्पास्तु देशरूपं समंजसं युक्तमौप ३३
यिकं लभ्यं भजमानाभिनीतवत् २४ न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनं

तरो राजा शत्रुः मित्रमतःपरं ९ उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः रिपौ वै
रिसपत्नारिद्विषद्द्वेषणदुर्हृदः १० द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः अ
भिघातिपरारातिप्रत्यर्थिपरिपंथिनः ११ वयस्यः स्निग्धः सवयाः अथ मित्रं
सखा सुहृत् सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनं १२ यथार्हवर्णः प्र
णिधिः अपसर्पश्चरः स्पशः चारश्च गूढपुरुषः आप्तप्रत्ययितौ समौ १३ सांव
त्सरो ज्यौतिषिको दैवज्ञगणकावपि स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका
अपि १४ तांत्रिको ज्ञातसिद्धांतः सत्री गृहपतिः समौ लिपिकरोऽक्षरचणो
ऽक्षरचुंचुश्च लेखके १५ लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ स्या
त्संदेशहरो दूतः दूत्यं तद्भावकर्मणी १६ अध्वनीनोऽध्वगोऽध्वन्यः पांथः पथिक

अ॰ टि॰ ३३ स्त्यश्वरथपादातंसेनांगंस्याच्चतुष्टयं ३३ दंतीदंतावलोहस्तीद्विरदोनेक
पोद्विपः मतंगजोगजोनागकुंजरोवारणःकरी ३४ इभस्तंबेरमःपद्मीयूथ
नाथस्तुयूथपः मदोत्कटोमदकलःकलभःकरिशावकः ३५ प्रभिन्नोगर्जि
तोमत्तःसमावुद्वांतनिर्मदौ हास्तिकंगजतावृंदेकरिणीधेनुकावशा ३६ गं
डःकटःमदोदानंवमथुःकरशीकरः कुंभौतुपिंडौशिरसःतयोर्मध्येविदुःपु
मान् ३७ अवग्राहोललाटंस्यादीषिकात्वाक्षिकूटकं अपांगदेशोनिर्याणं
कर्णमूलंतुचूलिका ३८ अधःकुंभस्यवाहित्थंप्रतिमानमधोस्यच आस
नंस्कंधदेशःस्यात्पद्मकंबिंदुजालकं ३९ पक्षभागःपार्श्वभागोदंतभागस्तु ३३
योग्रतः द्वौपूर्वपश्चाज्जंघादिदेशौगात्रावरेक्रमात् ४० तोत्रंवेणुकंआलानंबं

अववादस्तुनिर्देशोनिदेशः शासनंचसः २५ शिष्टिराज्ञाचसंस्थातुमर्यादाधा
रणास्थितिः आगोपराधोमंतुश्चसमेतूद्दानबंधने २६ द्विपाद्योद्विगुणोदं
डोभागधेयःकरोबलिः घट्टादिदेयंशुल्कोस्त्रीप्राभृतंतुप्रदेशनं २७ उपायन
मुपग्राह्यमुपहारस्तथोपदा यौतकादितुयद्देयंसुदायोहरणंचतत् २८ त
त्कालस्तुतदात्वंस्यादुत्तरःकालआयतिः सांदृष्टिकंफलंसद्यः उदर्कःफल
मुत्तरं २९ अदृष्टंवह्नितोयादिदृष्टंस्वपरचक्रजं महीभुजामहिभयंस्वपक्ष
प्रभवंभयं प्रक्रियात्वधिकारःस्याच्चामरंतुप्रकीर्णकं नृपासनंतुयद्भद्रासा
नंसिंहासनंचतत् ३१ हैमंछत्रंत्वातपत्रंराज्ञस्तुनृपलक्ष्मतत् भद्रकुंभःपू
र्णकुंभोभृंगारःकनकालुका ३२ निवेशःशिबिरंषंढेसज्जनंतूपरक्षणं हु

अ॰ द्विं॰ ३५

रितकंरेचितंवल्गितंप्लुतं ४८ गतयोमूःपंचधाराः घोणातुप्रोथमस्त्रियां क
विकातुखलीनोस्त्रीशफंक्लीबेखुरःपुमान् ४९ पुच्छोस्त्रीलूमलांगूलेवालह
स्तश्चवालधिः त्रिषूपावृत्तलुठितौपरावृत्तेमुहुर्भुवि ५० यानेचक्रिणियुद्धार्थे
शतांगःस्यंदनोरथः असौपुष्यरथश्चक्रयानंनसमराययत् ५१ कर्णीरथः
प्रवहणंडयनंचसमंत्रयं क्लीबेनःशकटोस्त्रीस्याद्गंत्रीकंबलवाह्यकं ५२
शिबिकायाप्ययानंस्याद्दोलाप्रेंखादिकास्त्रियां उभौतुद्वैपवैयाघ्रौद्वीपिच
र्मावृतोरथेः ५३ पांडुकंबलसंवीतोरथःस्यात्पांडुकंबली रथेकांबलवा
स्त्राद्याःकंबलादिभिरावृते ५४ त्रिषुद्वैपादयोरथ्यारथकड्यारथव्रजे ५५ धूः ३४
स्त्रीक्लीबेयानमुखंस्याद्रथांगमपस्करः चक्रंरथांगंतस्यांतेनेमिःस्त्रीस्या

धस्तंभेथ शृंखले अंडुको निगडोस्त्री स्यादंकुशोस्त्री सृणिः स्त्रियां ४१ दूष्यं
वरत्रा स्यात्कल्पना सज्जने समे प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो
द्वयोः ४२ वीतं त्वसारं हस्त्यश्वं वारी तु गजबंधनी घोटके पीति तुरगतुरं
गाश्वतुरंगमः ४३ वाजिवाहार्वगंधर्वहयसैंधवसप्तयः आजानीयाः कु
लीनास्युः विनीताः साधुवाहिनः ४४ वनायुजाः पारसीकाः कांबोजा बाल्ह
किलिका हयाः ययुरश्वोश्वमेधीयः जवनस्तु जवाधिकः ४५ पृष्ठ्यः स्थौरी
सितः कर्कः रथ्यो वोढा रथस्य यः बालः किशोरो वाम्यश्वा वडवा वाडवं गणे ४६
त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते. कश्यं तु मध्यमश्वानां हेषा ह्रेषा च
निःस्वने ४७ निगालः स्याद्गलोद्देशो वृंदे त्वाश्वीयमाश्ववत् आस्कंदितं धो

अ॰ टि॰ ३५

यशीर्षकं शीर्षण्यंकंचशिरस्त्रेथतनुत्रंवर्मदंसनं ६३ उरश्छदःकंकटकोजगरःकव
चोस्त्रियां आमुक्तःप्रतिमुक्तश्चपिनद्धश्चापिनद्धवत् ६४ संनद्धोवर्मितःसज्जोदंशि
तोव्यूढकंकटः त्रिष्वामुक्तादयःवर्मभृतांकावचिकंगणे ६५ पदातिपत्तिपदग
पादातिकपदाजयः पद्गश्चपदिकश्चाथपादातंपत्तिसंहतिः ६६ शस्त्राजीवःपृष्टकां
डायुधीयायुधिकाःसमाः कृतहस्तःसुप्रयोगविशिखःकृतपुंखवत् ६७ अपरा
द्धपृषत्कोसौलक्ष्याद्यःच्युतसायकः धन्वीधनुष्मान्धानुष्कोनिषंग्यस्त्रीधनुर्ध
रः ६८ स्यात्कांडवांस्तुकांडीरःशाक्तीकःशक्तिहेतिकः याष्टीकपारश्वधिकौयष्टि
पार्श्वधहेतिकौ ६९ नैस्त्रिंशिकोसितिस्यात्समौप्रासिककौंतिकौ चर्मीफलकपा ३५
णिःस्यात्पताकीवैजयंतिकः ७० अनुप्लवःसहायश्चानुचरोभिसरःसमौ पुरोगा।

स्रथिः पुमान् ५५ पिंडिकानाभिरक्षाग्रकीलके तु द्वयोरणिः। रथगुप्तिर्वरूथो
ना कूवरस्तु युगंधरः ५६ अनुकर्षो दार्वधःस्थं प्रासंगो ना युगाद्युगः सर्वं स्या
द्वाहनं यानं युग्यं पत्रं च धोरणं ५७ परंपरावाहनं यत्तद्वैनीतकमस्त्रियां आ
धोरणा हस्तिपकाः हस्त्यारोहा निषादिनः ५८ नियंता प्राजिता यंता सू
तः क्षत्ता च सारथिः सव्येष्टदक्षिणस्थौ संज्ञा रथकुटुंबिनः ५९ रथिनः
स्यंदनारोहा अश्वारोहास्तु सादिनः भटा योधाश्च योद्धारः सेनारक्षास्तु सैनि
काः ६० सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते बलिनो ये सहस्रेण
साहस्रास्ते सहस्रिणः ६१ परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः कं
चुको वारवाणः यत्तु मध्ये सकंचुकाः ६२ बध्नंति तत्सारसनमधिकांगो

हस्तबलविन्यासःभेददंडादयोयुधिः ७८ प्रत्यासारोव्यूहपार्ष्णिःसैन्यपृष्ठेप्र
तिग्रहः एकेभैकरथात्र्यश्वापत्तिपंचपदातिका ७९ पत्त्यंगैःस्त्रिगुणैःस
र्वैःक्रमादाख्यायथोत्तरं सेनामुखंगुल्मगणौवाहिनीपृतनाचमूः ८० अ
नीकिनीदशानीकीन्यक्षौहिणीथसंपदि संपत्तिश्रीश्चलक्ष्मीश्चविपत्यांविपदा
पदौ ८१ आयुधंतुप्रहरणंशस्त्रमस्त्रमथास्त्रियां धनुश्चापौधन्वशरासनकोदं
नपुंसके ८२ गोधिरस्थानीगोधेतलेज्याघातवारणे लेभकस्थमध्यंमौर्वीज्याशिंजि 
नीगुणः ८३ ँ१

ग्रेसरः प्रष्टाग्रतःसरपुरःसराः ७१ पुरोगमः पुरोगामी मंदगामीतुमंथरः जंघा
लोतिजवस्तुल्यौजंघाकरिकजांघिकौ ७२ तरस्वीत्वरितोवेगीप्रजवीजवनोज
वः जय्योयःशक्यतेजेतुंजेयोजेतव्यमात्रके ७३ जैत्रस्तुजेतायोगच्छत्यलं
विद्विषतःप्रति सोभिमित्रोभ्यमित्रीणोप्यभ्यमित्रीयइत्यपि ७४ ऊर्जःस्व
लःस्यादूर्जस्वीयऊर्जातिशयान्वितः स्यादुरस्वानुरसिलः रथिकोरथिनोसमौ
७५ कामंगाम्यनुकामीनोह्यत्यंतीनस्तथाभृशं शूरोवीरश्चविक्रांतःजेताजि
ष्णुश्चजित्वरः ७६ सांयुगीनोरणेसाधुःशस्त्राजीवादयस्त्रिषु ध्वजिनीवाहिनी
सेनापृतनानीकिनीचमूः ७७ वरूथिनीबलंसैन्यंचक्रंचानीकमस्त्रियां व्यू

अ॰
टि॰
५२

स्त्रिकोटयः ९४ सर्वाभिसारोसर्वौघः सर्वसन्नहनार्थकः लोहाभिसारोस्त्रभृ
तांराज्ञांनीराजनेविधिः ९५ यत्सेनयाभिगमनमरौतदभिषेणनं यात्राव्रज्या
भिनिर्याणंप्रस्थानंगमनंगमः ९६ स्यादासारःप्रसरणंप्रचक्रंचलितार्थकं
अहितान्प्रत्यभीतस्यरणेयानमभिक्रमः ९७ वैतालिकाबोधकराश्चाक्रिकाघांटि
कार्थकाः स्युर्मागधास्तुमगधाः वंदिनस्तुतिपाठकाः ९८ संसप्तकास्तुसमया
त्संग्रामादनिवर्तिनः रेणुर्द्वयोःस्त्रियांधूलिःपांसुर्नानद्वयोरजः ९९ चूर्णेक्षोदः
समुत्पिंजःपिंजलौभृशमाकुले पताकावैजयंतीस्यात्केतनंध्वजमस्त्रियां १००
सावीराशंसनंयुद्धभूमिर्यातिभयप्रदा अहंपूर्वमहंपूर्वमित्यहंपूर्विकास्त्रियां १ ५२
आहोपुरुषिकादर्पाद्यास्यात्संभावनात्मनि अहमहमिकातुसास्यात्परस्परंयोभ

स्यात्प्रत्यालीढमित्यादिस्थानपंचकं लक्ष्यंलक्षंशरव्यंचशराभ्यासउपासने
८७ पृषत्कबाणविशिखाअजिह्मगखगाशुगाः कलंबमार्गणशराःपत्रीरो
पइषुर्द्वयोः ८८ प्रक्ष्वेडनास्तुनाराचाःपक्षोवाजःस्त्रिषूत्तरे निरस्तःप्रहितेबा
णेविषाक्तदिग्धलिप्तकौ ८९ तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोः तूणी
खड्गेतुनिस्त्रिंशचंद्रहासासिरिष्टयः ९० कौक्षेयकोमंडलाग्रःकरवालःकृ
पाणवत् त्सरुःखड्गादिमुष्टौस्यान्मेखलातन्निबंधनं ९१ फलकोस्त्रीफलंचर्म
संग्राहोमुष्टिरस्ययः द्रुघणोमुद्गरघनौस्यादीलीकरवालिका ९२ भिंदिपाला
सृगस्तुल्यौपरिघःपरिघातनः स्याच्छस्त्रीचासिपुत्रीचछुरिकाचासिधेनुकाः ९३
वापुंसिशल्यंशंकुर्नासर्वलातोमरोस्त्रियां प्रासस्तुकुंतःकोणस्तुस्त्रियःपाल्य

अ॰
टि॰
२८

पे ९ मूर्छातुकश्मलंमोहोप्यवमर्दस्तुपीडनं अभ्यवस्कंदनंत्वभ्यासादनंवि
जयोजयः १० वैरशुद्धिःप्रतीकारोवैरनिर्यातनंचसा प्रद्रावोद्रावसंद्रावसंदा-
वाविद्रवः ११ अपक्रमोपयानंचरणेभंगःपराजयः पराजितपराभूतौत्रिषुन
ष्टतिरोहितौ १२ प्रमापनंनिर्वहनंनिकारणंविशारणं परासनंप्रवसनंनिषूद
नंनिहिंसनं १३ निर्वासनंसंज्ञपनंनिर्ग्रंथनमपासनं निस्तर्हणंनिहननंक्षणनंप
रिवर्जनं १४ निर्वापणंविशसनंमारणंप्रतिघातनं उद्वासनंप्रमथनक्रथनोज्जा
सनानिच १५ आलंभपिंजविशरघातोन्माथवधाअपि स्यात्पंचताकालधर्मोदिष्टांतःप्र २८
लयोत्ययः १६ अंतोनाशोद्वयोर्मृत्युःमरणंनिधनोस्त्रियां प्रमयोस्तीशेगितप्रा

वत्यहंकारः २ द्रविणं तरः सहो बलशौर्याणि स्थाम शुष्मं च शक्तिः पराक्रम
प्राणः विक्रमस्त्वतिशक्तिता ३ वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे यु
द्धमायोधनं जन्यं प्रधनं प्रविदारणं ४ अस्त्रियां समरानीकरणाः कलहविग्र
हौ संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ५ अभ्यामर्दसमाघातसंग्रा
माभ्यागमाहवाः समुदायः स्त्रियां यत्समित्याजिसमिद्युधः ६ नियुद्धं बाहु
युद्धे तु तुमुलं रणसंकुले क्ष्वेडा तु सिंहनादः स्यात्करिणां घटना घटाः ७ क्रंद
नं योधसंरावः बृंहितं करिगर्जितं विस्फारो धनुषः स्वानः पटहाडंबरौ समौ ८
प्रसभं तु बलात्कारो हठोऽथ स्खलितं छलं अजन्यं क्लीबमुत्पात उपसर्गः समं त्र

अ॰ द्वि॰ ३९ णंपर्युदंचनं ३ उद्धारोर्थप्रयोगस्तु कुसीदं वृद्धिजीविका याचयाप्तं याचितकं नि
मयादापमित्यकं ४ उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् कुसीदिको
वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः ५ क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीव
लः क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितं ६ यव्यं यवक्यं षष्टिक्यं यवादिभ
वनं हि यत् तिल्यतैलीनवन्माषोमाणुभंगाद्विरूपता ७ मौद्गीनकौद्रवीणादि शेष
धान्योद्भवक्षमं बीजाकृतं तूप्तकृष्टे सीत्यं कृष्टं च हल्यवत् ८ त्रिगुणाकृतं तृतीया
कृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् द्विगुणाकृते तु सर्वं पूर्वं शंबाकृतमपीह ९ द्रो
णाढकादिवापादौ द्रौणिकाढकिकादयः खारीवापस्तु खारीक उत्तमर्णादय ३९

हिंसात्ययानिमूलनं १७ परासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः मृतप्रमीतौ त्रि
ष्वेते चिता चित्या चितिः स्त्रियः १८ कबंधोऽस्त्री क्रियायुक्तमपमूर्धकलेवरं श्म
शानं स्यात्पितृवनं कुणपः शवमस्त्रियां १९ प्रग्रहोपग्रहौ बंदीकारा स्याद्बं
धनालये पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणं २० आयुर्जीवितकालो नां जी
वातुर्जीवनौषधेः २१ ॥ इति क्षत्रियवर्गः अष्टमः ८ ऊरव्या ऊरुजा वैश्या अ
र्या भूमिस्पृशो विशः आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने १ स्त्रियां कृ
षिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः सेवाः श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृ
तं २ द्वे याचितायाचितयोर्यथासंख्यं मृतामृते सत्यानृतं वणिग्भावः स्याद्

अ॰ टी॰ ४०

ह्रार्थेस्त्रीषयवलः गोधूमः सुमनः समौ स्याद्यावकस्तु कल्माषो चनको हरिम

न्थकः १८ द्वौतिलेतिलपेजश्चतिलपिंजश्चनिष्फले क्षवः क्षुताभिजननोरा

जिकाकृष्णिकासुरी १९ स्त्रियौकंगुप्रियंगूद्वेअतसीस्यादुमाक्षुमा मातुला

नीतुभंगायांव्रीहिभेदस्त्वणुःपुमान् २० किंशारुःसस्यशूकंस्यात्कणिशंसस्यमं

जरी धान्यंव्रीहिःस्तंभकरिःस्तंबोगुच्छस्तृणादिनः २१ नाडीनालंचकांडोस्यप

लालोस्त्रीसनिष्फलः कडंगरोबुसंक्लीबेधान्यत्वचितुषःपुमान् २२ शूकोस्त्रील

क्ष्णतीक्ष्णाग्रेशमीशिंबात्रिषूत्तरं ऋद्धमावसितंधान्यंपूतंतुबहुलीकृतं २३ ४

माषादयःशमीधान्येशूकधान्येयवादयः शालयःकलमाद्याश्चषष्टिकाद्याश्च

स्त्रिषु २० पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्यतु कैदारकं स्यात्कैदार्यं क्षेत्रंकै

दारिकंगणे २१ लोष्टानिलोष्टवः पुंसि कोटिशोलोष्टभेदनः प्राजनंतोदनंतो

त्त्रंखनित्रमवदारणे २२ दात्रंलवित्रमाबंधोयोत्रंयोक्त्रमथोफले निरीषकुट

कंफालःकृषकोलांगलंहलं २३ गोदारणंचसीरोथशम्यास्त्रीयुगकीलकः

ईषालांगलदंडःस्यात्सीतालांगलपद्धति २४ पुंसिमेधिःखलेदारुन्यस्तंयत्प

शुबंधने आशुर्व्रीहिःपाटलःस्यात्सितशूकयवौसमौ २५ तोक्मस्तुतत्रहरिते

कलायस्तुसतीनकः हरेणुखंडिकौचास्मिन्कोरदूषस्तुकोद्रवः २६ मंगल्य

कोमसूरोथमकुष्टकमयुष्टकौ वनमुद्गेसर्षपेतुद्वौतंतुभकदंबकौ २७ सि

अ॰
टि॰
४१

लशस्तुत्रिषुद्वयोः ३१ घटःकुटनिपावस्त्रीशरावोवर्द्धमानकः ऋजीषंपिष्टपच
नंकंसोस्त्रीपानभाजनं ३२ पात्रामत्रेचभाजनंदर्विःकंबिःखजाकाच स्यात्तर्दूर्दा
रुहस्तकःअस्त्रीशाकंहरितकं ३३ ग्रस्यतुनालिकाकडंबश्चकलंबश्चवेसवा
रउपस्करः तिंतिडीकंचचुक्रंचवृक्षाम्लमथवेल्लजं ३४ मरिचंकोलकंकृष्णमूष
णंधर्मपत्तनं जीरकोजरणोजाजीकणाकृष्णेतुजीरके ३५ सुषवीकारवीपृथ्वीपृथुःका
लोपकुंचिका आर्द्रकंशृंगवेरंस्यादथछत्रावितुन्नकं ३६ कुस्तुंबुरुधान्याकमथ
शुंठीमहौषधं स्त्रीनपुंसकयोर्विश्वंनागरंविश्वभेषजं ३७ आरनालकसौवीरा
कुल्माषाभिषुतानिच अवंतिसोमधान्याम्लकुंजलानिचकांजिकं ३८ सहस्र ४१

पुंस्यमी २४ तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका: अयोग्रं मुसलोस्त्री स्या
दुदूखलमुलूखलं २५ प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान् स्यूतप्र
सेवौ कंडोलपिटौ कटकिलिंजकौ २६ समानौ रसवत्यां तु पाकस्थानमहानसे
पौरोगवस्तदध्यक्षः सूपकारास्तु वल्लवाः २७ आरालिका आंधसिकाः सूदा औ
दनिका गुणाः आपूपिकः कांदविको भक्ष्यकार इमे त्रिषु २८ अश्मंतमुद्धान
मधिश्रयणी चुल्लिरंतिका अंगारधानिकांगारशकट्यपि हसंत्यपि २९ हस
नोप्यथ न स्त्री स्यादंगारोलातमुल्मुकं क्लीबेंबरीषं भ्राष्ट्रो ना कंदुर्वा स्वेदनी स्त्रि
यां ३० अलिंजरः स्यान्मणिकं कर्कर्यालुर्गलंतिका पिठस्थाल्युखा कुंडं क

ग्र॰ द्वि॰ ४२ जांगुभूस्त्विचात्ततः पृथुःस्याच्चिपिटकः धानाभृष्टयवेस्त्रियः ४६ पूपोऽपूपःपिष्ट
कःस्यात्करंभोदधिसक्तवः भिःसास्त्रीभक्तमंधोन्नमोदनोस्त्रीसदीदिविः ४७ भि
स्सटादग्धिकासर्वरसाग्रेमंडनस्त्रियां मासराचामनिस्रावामंडेभक्तसमुद्भवे ४८
यवागूरुष्णिकाश्राणाविलेपीतरलाचसा गव्यंत्रिषुगवांसर्वंगोविड्गोमयमस्
त्रियां ४९ तत्तुशुष्कंकरीषोस्त्रीदुग्धंक्षीरंपयःसमं पयस्यमाज्यदध्यादिद्रप्सं
दधिघनेतरं ५० घृतमाज्यंहविःसर्पिःनवनीतंनवोद्धृतं तत्तुहैयंगवीनंयद्ह्यो
गोदोहोद्भवंघृतं ५१ दंडाहतंकालशेयमरिष्टमपिगोरसः तक्रंह्युदश्विन्मथितं
पादांब्वर्धांबुनिर्जलं ५२ मंडंदधिभवंमस्तुपीयूषोभिनवंपयः अशनायाबुभुक्षा ४२

वैरिजन्तुकंवाह्लीकंहिंगुरामठं तन्त्रपत्रीकारवीपृथ्वीवाष्पिकाकवरीपृथु ३९
निशाह्वाकांचनीपीताहरिद्राचवरवर्णिनीसामुद्रंयत्तुलवणमक्षीवंवसिरंचत
त ४० सैन्धवोस्त्रीशीतशिवंमाणिमंथंचसिंधुजे रौमकंवसुकंपाक्यंविडंचक
तद्वयं ४१ सौवर्चलेक्षरुचकेतिलकंतत्रमेचके मत्स्यंडीफाणितंखंडविकारे
शर्करासिता ४२ हविकास्तीरविकृतिःस्याद्रसालातुमार्जिता स्यात्तेमनंतुनिष्ठा
नंत्रिलिंगावासितावधेः ४३ शूलाकृतंभटित्रंचशूल्यमुख्यंतुपैठरं प्रणीतमु
पसंपन्नंप्रयस्तंस्यात्सुसंस्कृतं ४४ स्यात्पिच्छिलंतुविजिलंसंमृष्टंशोधितंस
मे चिक्कणंमसृणंस्निग्धंतुल्येभावितवासिते ४५ आपक्वंपौलिरभ्यूषःला

अ॰ कः ६० शकृत्करिस्तु वत्सः स्यादम्यवत्सतरौ समौ आर्षभ्यः षंडतायोग्यः षंडो गो
टि॰ पतिरिट्चरः ६१ स्कंधदेशस्त्वस्य वहः सास्नातु गलकंबलः स्यान्नस्तितस्तु ना
५२ स्योतः प्रष्ठवाड्युगपार्श्वगः ६२ युगादीनां तु वोढारो युग्यप्रासंग्यशाकटाः खनति
तेन तद्वोढास्येदं हालिकसैरिकौ ६३ धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः उ
भावेकधुरीणैकधुरावेकधुरावहे ६४ स तु सर्वधुरीणो यो भवेत्सर्वधुरावहः माहे
यी सौरभेयी गौरुस्रा माता च शृंगिणी ६५ अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नै
चिकी वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ६६ द्विहायनी द्विवर्षा गौरेका ५२
ब्दा त्वेकहायनी चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ६७ वशा वंध्यावतोका

हटग्रासस्तुकवलार्थकः ५३ सपीतिस्त्रीतुल्यपानंसग्धीस्त्रीसहभोजनं उ
दन्यास्तुपिपासातृट्तर्षोजग्धिस्तुभोजनं ५४ जेमनंलेपआहारोनिघसोन्या
दइत्यपि सौहित्यंतर्पणंतृप्तिःफेलाभुक्तसमुज्झितं ५५ कामंप्रकामंपर्याप्तं
निकामेष्टंयथेप्सितं गोपेगोपालगोसंख्यगोधुगाभीरवल्लभाः ५६ गोमहि
ष्यादिकंपादबंधनंद्वौगवीश्वरे गोमान्गोमीगोकुलंतुगोधनंस्याद्गवांव्रजे ५७
त्रिष्वाशितंगवीनंतद्गावोयत्राशितापुरा उक्षाभद्रोबलीवर्दऋषभोवृषभोवृषः ५८
अनड्वान्सौरभेयोगौरुक्ष्णांसंहतिरौक्षकं गव्यागोत्रागवांवत्सधेन्वोर्वात्सकधैनुकं
वृषोमहान्महोक्षःस्याद्वृद्धोक्षस्तुजरद्गवः उत्पन्नउक्षाजातोक्षःसद्योजातस्तुतर्णि

अ॰ द्वि॰ ५५

न्द्वे दे स्यादौष्ट्रकौरभ्रकाजकं ७५ चक्रीवंतस्तु बालेयो रासभो गर्दभः खरः वैदेहकः

सार्थवाहो नैगमो वाणिजो वणिक् ७६ पण्याजीवो ह्यापणिकः क्रयः विक्रयकश्च

सः विक्रेता स्याद्विक्रयिकः क्रायिकः क्रयकः समौ ७७ वाणिज्यं तु वाणिज्या स्यान्मू

ल्यं वस्नोऽप्यवक्रयः नीवी परिपणो मूलधनं लाभोऽधिकं फलं ७८ परिदानं परीव

र्तो नैमेयनिमयावपि पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणं ७९ क्रये प्रसारितं

क्रय्यं क्रेयं क्रेतव्यमात्रके विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु ८० क्लीबे सत्यापनं

सत्यंकारः सत्याकृतिः स्त्रियां विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु ८१ ५५

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः संख्यार्थे द्विबहुत्वे स्तः तासु चानवतेः।

तस्वबद्धुभाद्यसंधिनी आक्रांतावृषभेणाथवेहद्गर्भोपघातिनी १८ काल्योपस

र्य्याप्रजनेप्रष्टौहीबालगर्भिनी स्यादचंडीतुसुकराबहुसूतिःपरेष्टुका १९ चि

रसूताबष्कयनीधेनुःस्यान्नवसूतिका सुव्रतासुखसंदोह्यापीनोध्नीपीवरस्त

नी २० द्रोणक्षीराद्रोणदुग्धाधेनुष्याबंधकेस्थिता समांसमीनासायैवप्रतिव

र्षंप्रसूयते २१ ऊधस्तुक्लीवमापीनंसमौशिवककीलकौ नपुंसिदामसंदा

नंपशुरज्जुस्तुदामनी २२ वैशाखमंथमंथानमंथानोमंथदंडके कुठारोदंडविष्कंभे

मंथनीगर्गरीसमे २३ उष्ट्रेक्रमेलकमयमहांगाःकरभःशिशुः करभाःस्युःशृंखल

कादारवैःपादबंधनैः २४ अजाछागीशुभछागबस्तछगलकाअजे तथा उष्ट्रोस्था

अ॰ द्वि॰ ४५ ताभ्यांयदन्यत्तत्कुप्यंरूप्यंतद्द्वयमाहतं मारुत्मतंमरकतमश्मगर्भोहरिन्मणिः ९·
शोणरत्नंलोहितकंपद्मरागोऽथमौक्तिकं मुक्ताथविद्रुमः पुंसिप्रवालंपुंनपुंसकं
सूर्यकान्तःसूर्यमणिःवैडूर्यंवालवायजं रत्नमणिर्द्वयोरश्मजातौमुक्तादिकेऽपि
च ९२ स्वर्णंसुवर्णंकनकंहिरण्यंहेमहाटकं तपनीयंशातकुंभंगांगेयंभर्मक
र्बुरं ९३ चामीकरंजातरूपंमहारजतकांचने रुक्मंकार्तस्वरंजांबूनदमष्टापदो
स्त्रियां ९४ अलंकारसुवर्णंयच्छृंगीकनकमित्यपि दुर्वर्णंरजतंरूप्यंखर्जूरंश्वेतमि
त्यपि ९५ रीतिःस्त्रियांमारकूटोनस्त्रियामथताम्रकंशुल्बंम्लेच्छमुखंद्व्यष्टवरिष्ठोदुं
बराणिच ९६ लोहोऽस्त्रीशस्त्रकंतीक्ष्णंपिंडंकालायसायसी अश्मसारोऽथमंडूरं ४५

स्त्रियः ८२ पंक्तेशतसहस्रादिक्रमाद्दशगुणोत्तरं यौतवंद्रुवयंपाय्यमितिमाना
र्थकंत्रयं ८३ मानंतुलांगुलिप्रस्थैर्गुंजाःपंचाद्यमाषकाः तेषोडशाक्षःकर्षोस्त्री
पलंकर्षचतुष्टयं ८४ सुवर्णबिस्तौहेम्नोक्षेकुरुबिस्तस्तुतत्पले तुलास्त्रियां
पलशतंभाराःस्याद्विंशतिस्तुलाः ८५ आचितोदशभाराःस्युःशाकटोभारआ
चितः कार्षापणःकार्षिकःस्यात्कार्षिकेताम्रिकेपणः ८६ अस्त्रियामाढकद्रो
णखारीवाहोनिकुंचकः कुडवःप्रस्थइत्याद्याःपरिमाणार्थकाःपृथक ८७
अंशस्तुरीयःपादःस्यादंशभागौतुवंटकः द्रव्यंवित्तंस्वापतेयंरिक्थमृक्थंधनंवसु
हिरण्यंद्रविणंद्युम्नमर्थरैविभवाअपि स्यात्कोशश्चहिरण्यंचहेमरूप्येकृताकृते

अ॰
टि॰
५६

स्तूलोत्तुंगंस्यात्कुसंभंवह्निशिखंमाहारजनमित्यपि ५ मेषकंबलऊर्णायुः
शशोर्णंशशलोमनि मधुमद्यंमाक्षिकादिमधूच्छिष्टंतुसिक्थकं ६ अरित्रा
भ्रमरवा—राटपान्निकारिग्रहः मर्यादसवषेशावत्उपकंठांतिकाभ्यर्णाभ्य
शामप्यभितोव्ययं ७ संसक्तेत्वव्यवहितमपदांतरमित्यपि नेदिष्टमंतिक
तमंस्याद्दूरंविप्रकृष्टकं दवीयश्चदविष्ठंचसुदूरंदीर्घमायतं वर्तुलंनिस्तलं
वृत्तंबंधुरंतून्नतानतकं ८ उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेथवामनेन्यङ्नीच ९
मनःशिलामनोगुप्तामनोह्विका नैपालीकुनटीगोलायवक्षारोयवाग्रजः १० ५६
पाक्योथसर्जिकाक्षारःकापोतोसुखवर्चकः सौवर्चलंस्याद्रुचकंत्वक्क्षीरीवंश

सिंहानमिति तन्मले ९७ सर्वं तत्तैजसं लोहं विकारस्त्वयसः कृशी तारःका

चोथपलो रसमूत्रस्थपारदे ९८ गवलं माहिषं शृंगं अभ्रकं गिरिजामले स्रोतं

जनं तस्मौवीरं कापोतांजनयामुने ९९ तुत्थांजने शिखिग्रीवं वितुन्नक मयूर

के कर्परी दार्विकाक्काथोद्भवं तस्यरसांजनं ०० रसगर्भं तार्क्ष्यशैलं गंधाश्मनि

गंधिकः सौगंधिकश्च चक्षुष्याकुलाल्यौ तकुलत्थिका १ रीतिपुष्पं पुष्पकं च

पौष्पिकं कुसुमांजनं पिंजनं पीतनं तालमलं च हरितालके २ गैरेयमर्थ्यं गिरिजं

मश्मकं तु शिलाजतु बोलगंधरसप्राणापिंडगोसरसाः समाः ३ डिंडीरोब्धिकफः

फेनः सिंदूरं नागसंभवं नागः सीसकयोगेष्टवप्राणि त्रपु पिच्चटं ४ रंगवंगे पिच्चु

अ॰ रक्तमालिकः ५ कुंभकारः कुललः स्यात्पलगंडस्तु लेपकः तंत्रवायः कुविं
दः स्यात्तुन्नवायस्तु सौचिकः ६ रंगाजीवश्चित्रकारः शस्त्रमार्जोसिधावकः पादूकृ
च्चर्मकारः स्याद्व्योकारो लोहकारकः ७ नाडिंधमः स्वर्णकारः कलादो रुक्मका
रके स्याच्छंखिकः कांबविकः शौल्विकस्ताम्रकुट्टकः ८ तक्षा तु वर्धकिस्त्वष्टा रथका
रश्च काष्ठतट् ग्रामाधीनो ग्रामतक्षः कौटतक्षोनधीनकः ९ क्षुरी मुंडी दिवाकी
र्त्तिनापितांतावसायिनः निर्णेजकः स्याद्रजकः शौंडिको मंडहारकः १० जाबा
लः स्यादजाजीवो देवाजीवस्तु देवलः स्यान्माया शांबरी मायाकारस्तु प्रातिहारकः ५१
शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः भरता इत्यपि नटाः चारणास्तु कु

रोचना १२ शिग्रुच श्वेतमरिचं मोरटं मूलमैक्षवं ग्रंथिकं पिप्पलीमूलं चटिकाशि

रइत्यपि १३ गोलोमीभूतकेशोनापत्रांगंरक्तचंदनं त्रिकटुत्र्यूषणंव्योषंत्रिफला

तुफलत्रिकं १४ ॥ इतिवैश्यवर्गः ९ शूद्राश्चावरवर्णाश्चवृषलाश्चजघन्यजा

आचंडालात्तुसंकीर्णाअम्बष्ठकरणादयः १ शूद्राविशोस्तुकरणोंबष्ठोवैश्याद्वि

जन्मनोः शूद्राक्षत्रिययोरुग्रोमागधःक्षत्रियाविशोः २ माहिष्योर्याक्षत्रिययोःक्ष

त्तार्याःशूद्रयोस्सुतः ब्राह्मण्यांक्षत्रियात्सूतःतस्यांवैदेहकोविशः ३ रथकारस्तु

माहिष्यात्करण्यांयस्यसंभवः स्याच्चंडालस्तुजनितोब्राह्मण्यांवृषलेनयः ४

कारुःशिल्पीसंहतैस्तैर्द्वयोःश्रेणिःसजातिभिः कुलकःस्यात्कुलश्रेष्ठिमालाका

अ॰
द्वि॰
५८

नैगमाः १९ निषादश्वपचावंतेवासिचंडालपुक्कसाः भेदाःकिरातशबरपुलिंदाम्ले
च्छजातयः २० व्याधोमृगवधाजीवोमृगयुर्लुब्धकोपिसः कौलेयकःसारमेयः
कुक्कुरोमृगदंशकः २१ शुनकोभषकःश्वास्यादलर्कस्तुसयोगतः श्वाविश्वक
द्रुर्मृगयाकुशलःसरमाशुनी २२ विट्चरःसूकरोग्राम्यःकर्करस्तरुणःपशुः आ
च्छोदनंमृगव्यंस्यादाखेटोमृगयास्त्रियां २३ दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्माकुरंग
कः चौरैकागारिकस्तेनदस्युतस्करमोषकाः २४ प्रतिरोधिपरास्कंदिपाटच्चरम
लिम्लुचाः चौरिकास्तैन्यचौर्येचस्तेयंलोप्त्रंतुतद्धने २५ वीतंसस्तूपकरणंबंधनेमृ ५८
गपक्षिणां उन्माथःकूटयंत्रंस्याद्वागुरामृगबंधिनी २६ शुल्बंवराटकंस्त्रीतुरज्जुस्त्रि

शीलवाः १२ मार्द्दंगिकामौरजिकाःपाणिवादास्तुपाणिघाः वेणुर्ध्मास्युःवैन
विकाःवीणावाशस्तुवैणिकाः १३ जीवांतकःशाकुणिकोद्वौरिवाकजालिकौ
वैतंसिकःकौटिकश्चमांसिकश्चसमंत्रयं १४ भृतकोभृतिभुक्कर्मकरोवैतनि
कोपिसः वार्त्तावहोवैवधिकोभारवाहस्तुभारिकः १५ विवर्णःपामरोनीचप्राकृ
तश्चपृथग्जनः निहीनोपसदोजाल्मःक्षुल्लकश्चेतरश्चसः १६ भृत्येदासेर
दासेयदासगोप्यकचेटकाः नियोज्यकिंकरःप्रैष्यभुजिष्यपरिचारकाः १७ परा
चितपरिस्कंदपरजातपरैधिताः मंदस्तुंदपरिमृजआलस्यःशीतकोणिश १८
दक्षेतुचतुरपेशलपटवःसूत्थानउष्णश्च चंडालप्लवमातंगदिवाकीर्तिज

अ॰
टि॰
५९

णाः क्रकचोऽस्त्री करपत्रं स्यादारा चर्मप्रभेदनी २५ सूर्मी स्थूणायःप्रतिमा शिल्पं कर्मक
लादिकं प्रतिमानं प्रतिबिंबं प्रतिमा प्रतियातना २६ प्रतिच्छाया प्रतिकृतिरर्चा पुंसि प्र
तिनिधि रुपमोपमानं स्यात् वाच्यलिंगाः समस्तुल्यः २७ सदृक्षः सदृशः सदृक् सा
धारणः समानश्च स्युरुत्तरपदे त्वमी निभसंकाशनीकाशप्रतीकाशोपमादयः २८
कर्मण्या तु विधा भृत्याभृतयो भर्म वेतनं भरण्यं भरणं मूल्यं निर्वेशः पणरत्यपि २९ सुरा
हलिप्रिया हाला परिस्रुद्वरुणात्मजा गंधोत्तमा प्रसन्नेराकादंबर्यः परिस्रुता ३० म
दिका श्यमद्ये चाप्यवदंशस्तु भक्षणं शुंडापानं मदस्थानं मधुवारा मधुक्रमाः ३१
मध्वासवो माधवको मधु माध्वीकमद्वयोः मैरेयमासवः शीधुः मेदको जगलः समौ ५९

पवत्रेगुणः उद्घाटनंघटीयंत्रंसलिलवाहमप्रहेः २७ पुंसिवेमावायदंडःसूत्राणिन
रितंतवः वाणिर्व्यूतिस्त्रियांतुल्येपुस्तंलेप्यादिकर्मणि २८ पंचालिकापुत्रि
कास्याद्वस्त्रदंतादिभिःकृता जतुत्रपुविकारेतुजातुषंत्रापुषंत्रिषु पिटकःपेटकःपे
टामंजूषाथविहंगिका ३० भारयष्टिस्तदालंबिशिक्यंकाचोथपादुका पादूरुपानस्त्री
सैवानुपदीनापदायता ३१ नद्धीवध्रीवरत्रास्यादश्वादेस्ताडनीकशा चंडालिकात
कंडोलवीणाचंडालवल्लकी ३२ नाराचीस्यादेषणिकाशाणस्तुनिकषःकषः व्रश्च
नःपत्रपरशुरीषिकातूलिकासमे ३३ तैजसावर्तनीमूषाभस्त्राचर्मप्रसेविका आ
स्फोटनीवेधनिकाकृपाणीकर्तरीसमे ३४ वृक्षादनीवृक्षभेदीटंकपाषाणदार

अ॰ द्वि॰ ५०

संधानंस्यादभिषवकिण्वंपुंसितुनग्नहूः॥ कारोत्तमासुरामंडःआपानंगोष्ठिका ५३
चषकोस्त्रीपानपात्रंसरकोप्यनुतर्षणं॥ धूर्तोक्षदेवीकितवोक्षधूर्तोद्यूतकृत्समाः ५४
स्युर्लग्नकाःप्रतिभुवःसभिकाद्यूतकारकाः॥ द्यूतोस्त्रियामक्षवतीकैतवंपण इत्यपि॥ ५५
पणोक्षेषुग्लहोक्षास्तुदेवनाःपाशकाश्चते॥ परिणायस्तुशारीणांसमंतान्नयनेस्त्रियां॥
अष्टापदंशारिफलंप्राणिद्यूतंसमाह्वयः॥ उक्ताभूरिप्रयोगत्वादेकस्मिन्येत्रयौगिकाः॥
५७ ताद्धर्म्यादन्यतोवृत्तावूह्यालिंगांतरेपिते ५८ ॥ इतिशूद्रवर्गः १० ॥ इतिश्रीअम
रसिंहकृतौनामलिंगानुशासनेभूम्यादिकांडःद्वितीयः २ समाप्तः शुभमस्तु शुभमस्तु॥

५०

ناران کا شناسن

(21)

176